किंच विप्रदंडोद्यमेकृच्छ्रस्त्वतिकृच्छ्रोनिपातने कृच्छ्रातिकृच्छ्रोऽसृक्पाते कृच्छ्रोभ्यंतरशोणितइति १ विप्रजिघांसयादंडोद्यमेकृच्छ्रःशुद्धिहेतुः निपातनेताडनेअतिकृच्छ्रः रुधिरस्त्रवणेकृच्छ्रातिकृच्छ्रः ताडनादिनाअभ्यंतरशोणितेपिकृच्छ्रःशुद्धिहेतुः॥ बृहस्पतिनाप्यत्रविशेषउक्तः॥ काष्ठादिनाताडयित्वात्वग्भेदेकृच्छ्रमाचरेत् अस्थिभेदेऽतिकृच्छ्रःस्यात्पराकस्त्वंगकर्तने १ यमः॥ पादेनब्राह्मणंस्पृष्ट्वाप्रायश्चित्तविधित्सया दिवसोपोषितःस्नात्वाप्रणिपत्यप्रसादयेत् १ सानुवंधेएतत्अनुवंधश्चवाचाधर्षणम् इच्छापूर्वकदोषकरणमनुवंधइतिशब्दार्थचिंतामणिः॥ तथा॥ अवाच्यंब्राह्मणस्योक्त्वाप्रायश्चित्तंविधीयते कृच्छ्रातिकृच्छ्रंकृत्वातुप्रणिपत्यप्रसादयेत् १॥ एतत्तुपीडातिशयऽनुवंधातिशयेच आक्रोशमनृतंहिंसामनुवंधंसमाचरेत् एकरात्रंत्रिरात्रंवाषड्रात्रंवाविधीयते॥ २॥

पाद स्पर्शहै तिस विषे जानणा अनुवंध क्या वाणी करके जो निरादर करणा तिसका नामहै. इच्छा सें जो दोष करणाहै तिसका नाम अनुवंधहै एह शब्दार्थ चिंतामणिमें लिखा है॥ तिस प्रकार औंरभी कहतेहैं अवेति ब्राह्मणकों खोटा वचन कहके प्रायश्चित्तनूं करे क्या कृच्छ्राति कृच्छ्र व्रतनूं करके चरणोंतें पकड कर ब्राह्मणकों प्रसन्न करे॥ १ ॥ एहअतिशयकरकें पीडा अर अतिशय करके अनुवंधके विषे जानणा॥ अब और कथन करतेहैं आक्रोशमिति ब्राह्मण और गुरु और वृद्ध और सिद्ध इनको झूठी चोरी लगाणी और झूठा कथन करणा और हिंसा और इच्छा सें व्यभिचारादि अपराध करणा इनांनू आचरण करके एकरात्र अथवा तीन ३ रात्र अथवा छे६ रात्र उपवासकरे ॥ २

मनुजीका वाक्यहै ॥ विनेति जलतोंविना अथवाजलकेमध्यमें जो पुरुष मूत्रऊर विष्ठा नूं करताहै सो ग्रामतेबाहर जाकर सहितवस्त्रोंके नद्यादिमें स्नानकरके पीछेसें गौनूंस्पर्शकरके शुद्ध होताहै १ ॥ एह विनाकामनासें जो पापहै तिसकाविषयहै । असन्निहित इत्यादिपदोंमें इसश्लोककाहि अर्थहै अबकामनाके विषयमेंकहतेहैं आपेति आपदाकेविषे जोपुरुषजलतें विनामूत्र ऊर पुरीष कों करदाहै अर्थात् जलतें विना पिशाव ऊर विष्ठा बैठदाहै सो एक दिन उपवास नूं करके पश्चात् समेत वस्त्रादे जल विषे स्नानकरे एह यमजीका कथन जानना ॥ १ ॥ अनापदा केविषे इसतें दूणाकरे ॥ जो सुमंतुजीकावाक्यहै कि जलोंके मध्यमें ऊर अग्नि के विषे मूत्र ऊर पुरीषकों जो पुरुष त्यागता है तिसको तप्तकृच्छ्र व्रत करणा चाहिए ॥ एह सुखवालेपुरुषका ऊर अभ्यासकाविषयहै । अनभ्यासके विषे शंख और लिखितजी कहतेहैं रेत इति

मनुः ॥ विनाद्भिरप्सुवाप्यन्तः शारीरंसन्निषेव्यतु सचैलोवहिराप्लुत्यगामा लभ्यविशुद्ध्यति।१ असन्निहितजलोजलमध्येवाशारीरंमूत्रपुरीषादिकंकृत्वा सवासावहिर्ग्रामाद्नद्यादौ स्नात्वा गां च स्पृष्ट्वाशुद्ध्यति।इदमकामतः का मतस्तु आपद्गतोविनातोयंशारीरंयोनिषेवते एकाहंक्षपणंकृत्वासचैलो जलमाविशेदितियमोक्तंवेदितव्यम् अनापदितु द्विगुणम् यत्तु सुमंतुवचन म् अप्स्वग्नौ वामे हतस्तप्तकृच्छ्रमिति तदनार्त्तविषयमभ्यासविषयंवा अ नभ्यासेतु शंखलिखितौ रेतोमूत्रपुरीषाण्युदकेकृत्वात्रिरात्रोपोषितइदमा पः प्रवहतेत्यृचंजपेत् यमः अटव्यामटमानस्यब्राह्मणस्यविशेषतः प्रणष्टस लिलेदेशेकथंशुद्धिर्विधीयते॥१॥अपोदृष्ट्वैवविप्रस्तुकुर्य्याच्छौचंसचैलकम्॥ गायत्र्यष्टशतंजप्यंस्नानमेतत्परंभवेत् ॥ २॥ देशंकालंसमासाद्यानावस्था मात्मनस्तथा धर्म्मंशौचंचसंतिष्ठन्नकुर्य्यान्वेगधारणम् ॥३॥ वेगोमलवेगः

जोपुरुष वीर्य और मूत्र और पुरीष इनांनू जलके विषे त्यागताहै सो पुरुष तीन १ रात्र उपवासनू रखकर इद माप प्रवहतइस ऋचांकों एकवार अथवा १० वार जपे यमजीका वाक्यहै (प्रश्न) अटव्यामिति वनके विषे गमन करदा होआ सुचेतहोणेकी इच्छावालाजो ब्राह्मणहै जलतें रहित देशके विषे तिसकी किसप्रकार शुद्धि विधानकीतिहै ॥ १ ॥ (उत्तर) तिसकी शुद्धि कहतेहैं ॥ अपइतिसो ब्राह्मणजलनूं देख करके सहित वस्त्रांदे शुद्धि नूं करेपश्चात् एक सौ आठ १०८ वारगायत्रीकों जपे एह परम स्नानहोताहै ॥२॥ देशमिति देश और काल और अपनी अनवस्थाकों प्राप्तहोकरके धर्म और शुद्धि नू जैसादेखतैसा कर लेवे और मलके वेग नू कदेभी ना धारण करे क्यों किमलकावेग सहारणे सेरोगकी उत्पत्ति होजातीहै॥३

नित्यकर्मके नाशके विषे मनु जी प्रायश्चित्त कथन करतेहैं ॥ वेदोदितेति वेदके विषे विधान कीते जो संध्यावंदन अग्नि हवनादि नित्य कर्महैं तिनके और मनुस्मृतिके चौथे ४ अध्यायमें कथन कीते जो स्नातक व्रतहैं तिनके नाशहोआं होआं एक १ उपवास व्रत कोंकरे ॥१॥ वेद विहित इत्यादिपदोंकर्केइसी श्लोककाहि अर्थस्पष्ट कीताहै ॥इसी विषे में बृहस्पति जीका भी वाक्यहै ॥ अनीति पाठ १ और होम २ अतिथि पूजन ३ और तर्पण ४ और वैश्वदेवबलि ५ इनांपंचमहायज्ञांको न कर्के रोगादितें रहित होआ होआ और धनके भी होआं होआं जो गृहस्थी पुरुष अन्नका भक्षण करदाहै सो आधे कृच्छ्र व्रत कर्के शुद्ध होताहै ॥१॥ आहितेति अग्नि होत्री जो पुरुष अष्टमी १ और द्वादशी २ और अमावास्या ३ और पौर्णमासी ४ और सूर्य्य संक्रांति ५ इन पंचपर्वांके विषे होमनूं नहि करदा

नित्यकर्म्मलोपेतुमनुः ॥ वेदोदितानांनित्यानांकर्म्मणांसमातिक्रमे स्नातक व्रतलोपेचप्रायश्चित्तमभोजनम् ॥१॥ वेदविहितकर्म्मणामग्निहोत्रादीनामनुपदिष्टप्रायश्चित्तविशेषाणांचपरिलोपे मनुचतुर्थाध्यायोक्तानांस्नातकव्रतानांच लोपे जाते एकाहोपवासंव्रतंकुर्य्यात् ॥ बृहस्पतिः ॥ अनिर्वर्त्यमहायज्ञान्योभुंक्तेप्रत्यहंगृही अनातुरः सतिधनेकृच्छ्रार्द्धेनसशुद्ध्यति॥१॥आहिताग्निरुपस्थानंनकुर्य्याद्यस्तुपर्वाणि ऋतौनगच्छेद्भार्य्यांयः सोपिकृच्छ्रार्द्धमाचरेदिति॥२॥स्नातकव्रतमधिकृत्यक्रतुनाप्युक्तम्॥एतेषामाचाराणामेकैकस्यव्यतिक्रमेगायत्र्यष्टशतंजप्त्वापूतोभवति॥ अत्रविशेषोऽग्रेबोध्यः। ऋष्यशृंगः॥ इन्द्रचापंपलाशाग्निंयद्यन्यस्यप्रदर्शयेत् प्रायश्चित्तमहोरात्रंधनुर्दंडश्चदक्षिणेति ॥१ ॥इन्द्रचापोमेघांतरीयःअकस्मात्पलाशेषुपत्रेषुजातोयोऽग्निःसपलाशाग्निः इंद्रचापप्रदर्शनेधनुर्दक्षिणा पलाशाग्निप्रदर्शनेदंडइति

और जो पुरुष ऋतुकालके विषे अपणी स्त्रीमेंगमन नहि करदा सोभी अर्द्धकृच्छ्र व्रत नूं करे ॥ २ स्नातक व्रतकों अधिकार करके क्रतुजीनेभी कहाहै ॥ एतइति इनां कर्म्मां के मध्यमें एकके भी व्यतिक्रमके विषय अर्थात् नाशदे होआंहोआं गायत्रीको एकसौ आठ वार १०८ जप करके पवित्रहोता है ॥ इसके विषय अधिक कहणाहै सो आगे जाणलैणा ऋष्यशृंग जीका वाक्यहै मेघ वर्षणतें पीछे जो आकाशके विषें इंद्रका धनुष पडताहै तिसकों और पत्रांके विषस्वभावक उत्पन्न होआ जो अग्नि है तिसकों जद औरी पुरुषकों दखावे तब एक दिन रात्र उपवास करे अर धनुष और दंड एह दक्षिणा देवे अर्थात् इंद्रचाप दखाणेमें धनुष दक्षिणा अर पलाशअग्नि दखाणेमें दंडा दक्षिणा ॥ १ ॥

शंखऋषिका वचनहै अभ्येति॥पलाशवृक्षकी खड़ाओर गाडी ओर पीपे ओर दातन इन्होंको प्राप्तहोकरके ब्राह्मण ओर क्षत्रि ओर वैश्य तीन ३ रात्र उपवास व्रतकरे।१। अब क्षत्रीकों युद्धके विषय नसनेका दोष कहतेहैं क्षत्रीति क्षत्रीजो युद्धके विषय मृत्युतें डरता होआ नसजावे अर फलवाले वृक्षकों जो काटताहै सो पुरुष एक वर्षपर्यंत व्रतकोंकरे इसमें यावक व्रतग्रहण करणा अर्थात् यव भक्षणकरणे पूर्वोक्त शंखजीके वाक्यतें।२। दो ब्राह्मणआदिके वीचलंघनेका दोष कहतेहैं॥ द्वाविति दो ब्राह्मण १ ब्राह्मण ओर अग्नि २ अर स्त्री ओर पति ३ अर गो ओर बेल ४ इनके मध्यमे जबपुरुष लंघे तब सांतपन कृच्छ्र व्रतकों करे॥ ३॥ इसी विषयमें जो अंगिरा ऋषिका वाक्यहै॥ दंपती स्त्री ओर भर्ता अर दो ब्राह्मण

शंखः॥ अभ्यास्यशयनंयानंपादुकांदन्तधावनम् द्विजःपलाशवृक्षस्यत्रिरात्रंतुव्रतीभवेत्।१।क्षत्रियस्तुरणेपृष्ठंदत्त्वाप्राणपरायणः। संवत्सरंव्रतंकुर्य्याच्छित्त्वावृक्षंफलप्रदम्।२। व्रतमत्रयावकंशंखोक्तत्वात्।॥।द्वौविप्रौब्राह्मणाग्नीचदंपतीगोवृषौतथा अन्तरेणयदागच्छेत्कृच्छ्रंसांतपनंचरेत्॥ ३ ॥ यत्त्वंगिराः दंपत्योर्विप्रयोरग्न्योर्विप्राग्न्योर्वाद्विजातिषु अंतरंयोऽवगच्छेत्तुद्विजश्चान्द्रायणंचरेदित्येतत्कामकारविषयमभ्यासविषयंच॥होमकालेतथादोहे स्वाध्यायेदारसंग्रहे। अन्तरेणयदागच्छेद्द्विजश्चान्द्रायणंचरेत्।२। एतच्चमार्गान्तरसंभवेसतिद्रष्टव्यम् दोहे सान्नाय्यांगभूते ॥

२ दो अग्निआं ३ अर ब्राह्मण ओर अग्नि ४ इनकेमध्यमे ब्राह्मण ओर क्षत्री अथवा वैश्य जो लंघता है सो पुरुष शुद्धिके वास्ते चांद्रायण व्रतकोंकरे । १ । एहकाम ओर अभ्यासका विषयहै॥ अब ओर कथन करतेहैं। होमेति होम कालके विषय तिसप्रकार गौके दोहन समयमें अर अध्ययन समयमें अर विवाह समयमें ब्राह्मण अर क्षत्रि अथवा वैश्य जद मध्यमें लंघताहै सो शुद्धिके वास्ते चांद्रायण व्रतकोंकरे एहदोष दूसरे मार्गके होआहोआ जानणा जेकर ओर मार्ग नहोवे तब इसका दोषनहि जानणा इसजगा जो दोहनहै सो सान्नाय्यांग रूपजो यज्ञ कर्म्म तिसके अर्थवाले दोहनमे जानणा॥ २ ॥

जलतें विना मूत्र और पुरीष करणमें सुमंतुका भी वाक्यहै अनुदेति जलतें विना मूत्र और पुरीषके त्यागनेके विषय अर नख और बाल और रुधिर इनके भक्षण करणेमें तात्काल स्नान करे अर घृत और कुशा और स्वर्ण इनका जल पानकरे इसमें घृतादि पानकों प्रायश्चित्तके अर्थ होणेतें भोजन भक्षण न करणा किंतु उसीको भोजनके स्थानसमझणा यत्त्विति जो मूत्रऔर पुरीष इनके कीतिआं जब जल न होवे तब जलकोंमाप्त हो करके सहित वस्त्रांदे स्नान करके पी वेतो शुद्ध होताहे इहवाक्यहै॥ १ ॥ और जो शातातपका वाक्यहे अनुदेति जलतें विना मूत्र और पुरीष करणेमें सहित वस्त्रांके स्नानकरे और सप्त महाव्याहृतिआं करके हवन करे एह

अनुदकमूत्रपुरीषकरणे सुमंतुरपि अनुदकमूत्रपुरीषकरणेनखकेशरुधिरप्राशने सद्यःस्नानं घृतकुशहिरण्योदकपानंचेति अत्र घृतादिपानस्य प्रायश्चित्तार्थत्वाद्भोजननिषेधः यत्तुकृतेमूत्रेपुरीषेवायदानैवोदकंभवेत् स्नात्वालब्ध्वोदकंपश्चात्सचैलस्तुविशुद्ध्यतीति १ यच्च शातातपः अनुदकमूत्रपुरीषकरणे सचैलंस्नानंमहाव्याहृतिहोमश्चेति तदकामतः तथा नोदन्वतोंभासिस्नायान्नचश्मश्र्वादिकर्त्तयेत् अंतर्वत्न्याः पतिःकुर्वन्नप्रजोभवतिध्रुवम् ॥ १ ॥ अयंचनिषेधःसप्तममासादूर्ध्वम् तथाच त्रिस्थलीसेतौवचनम् वपनंमैथुनंतीर्थंवर्जयेद्गुर्विणीपतिः श्राद्धंचसप्तमान्मासादूर्ध्वंनाऽन्यत्रवेदाविदिति ॥ १

वाक्य अकामके विषयमे जानने॥तिस प्रकार गर्भवाली स्त्रीके पतिको समुद्र स्नानादिका निषेध करतेहैं नवेति गर्भवाली स्त्रीका पति समुद्रके जलविषय स्नान न करे अर दाडीआदिके वालां भी न कटावे जो कदाचित् एह काम करे तब निश्चय करके संतानतें रहित होताहे एह निषेध सप्तम मासतें उपरंत जानना सप्तम मासतें उरे इनका दोष नहि जानना १ ॥ तिस प्रकार त्रिस्थली सेतुमें भी किसेका वचन लिखाहै वपनमिति गर्भवाली स्त्रीकापति वेदके जानने वाला सप्तम मासतें उपरंत मुंडन और मैथुनऔर तीर्थयात्रा औरश्राद्धका भोजन इनानूं नसेवे १

इस विषय साधारण प्रायश्चित्त जोडनें योग्यहे तैसे दखाते हैं॥ प्राणेति इसजगा ऐसा अर्थ करणाकि उपपातक जिनोंतें उत्पन्न होतेहैं जेसे अवगूरणादिते गोवध रूप उपापतक उत्पन्न होताहै ऐसे सभपापांके दूरकरणे वास्ते और अनादिष्टजोपाप हैं (नोदन्वतोंभसिस्नायात्) इत्यादिश्लोकांककें कहेहोए तिना सबनां पापांके दूरकरणे वास्ते १०० प्राणायामकिहाहे सर्व शब्दका अन्यइस रीतिसें लगाणा यथा भुत नहि लगाणा क्योंकि १०० प्राणायामसे सारे पाप नाहि दूरहो सके ॥१॥ याज्ञवल्क्यजीका वाक्य कथनकरतेहैं देशमिति देश

श्राद्धंश्राद्धभोजनमित्यर्थः अत्र सामान्यप्रायश्चित्तंयोज्यम् तद्यथाप्राणायामशतंकार्य्यंसर्वपापापनुत्तये उपपातकजातानामनादिष्टस्यचैवहीति ॥ १ ॥ याज्ञवल्क्यः देशंकालंवयःशक्तिंपापंचावेक्ष्ययत्नतःप्रायश्चित्तंप्रकल्प्यंस्याद्यस्यचोक्तानानिष्कृतिरिति १ ॥ मनुः॥शरणागतंपरित्यज्यवेदंविप्लाव्यचद्विजः संवत्सरंयवाहारस्तत्पापमपसेधति॥१॥अर्थः॥परित्राणार्थमुपगतं शरणागतं शक्तःसन्नुपेक्षतेयोद्विजःअनध्याप्यंवेदमध्याप्य एतज्जनितंपापं संवत्सरं निरंतरं यवाहारोऽपनुदति उपपातकानिगोवधादीनिजातानियेभ्योऽवगूरणादिभ्यस्तानितेषांचपुनरनादिष्टस्यनोदन्वतोंभासिस्नायादित्यादिनाकथितसर्वपापापनुत्तये प्राणायामशतंकार्य्यमित्यर्थः

और कालऔर आयुषा और वल और पाप इनांनू देखकरके यत्ननाल प्रायश्चित्त कल्पना करना चाहिए अरजिसपापका प्रायश्चित्त नहिकहा तिसका भी यथा योग्य प्रायश्चित्त कल्पना करणा चाहिए ।१।आगे मनुजीका वाक्यहे॥ शरेति रक्षाके अर्थं वास्ते शरणी आनपडा जोपुरुषहै तिसनू जो समर्थ होआ पुरुष त्याग देताहै और वेदनू आप ना पड करके जो पुरुष दूसरे नू भडाताहै सो पुरुष एक १ वर्ष पर्यंत यवांनू भक्षण करदा होआ तिस पापनूं दूर करताहै अर्थः इत्यादि पदों करकें इसी श्लोक का हि अर्थ कीताहै ॥ १॥

षट्त्रिंशत्के मतविषय यमजीका वाक्यहै ॥ चांडालेति वेदऔर मन्वादिस्मृति इनके पाठनूं चांडाल श्रवण कर लेवे तब पाठ करणेवाला पुरुष एकरात्र उपवास व्रत करे ॥ वसिष्ठजी कहतेहैं ॥ पतितेति ॥ पापी और चंडाल और धूर्त इनके समीप जानकरके जो वेद पढे तब तीन ३ रात्र उपवास करें वाणीनूं रोक करके स्थितहोंणा भोजन नूं न भक्षण करदेहोए स्थित होणा अथवा जितनाक पाठ चांडालादियोंने श्रवण कीताहै तितने पाठ नूं हजार १०००वार जपें तब पवित्र होतेहैं ॥ शठश्रावणं इत्यादिपदोंमें एहि अर्थहै ॥ सर्पादिकेमध्यमें गमन करणेमें यमजी

षट्त्रिंशन्मते ॥ यमः ॥ चांडालश्रोत्रावकाशे श्रुतिस्मृतिपाठे एकरात्रमभोजनमिति वृद्धिकृते तु वासिष्ठश्चाः ॥ पतितचांडालशठश्रावणे त्रिरात्रम् वाग्यता अनश्नंत आसीरन् सहस्रपरंवा तदभस्यन्तःपूताभवंतीति विज्ञायते शठश्रावणं शठसांन्निधावध्ययंनम् सहस्रपरमितियावान्भागश्चांडालादिभिःश्रुतस्तावंतंभागंसहस्रकृत्वोजपेदित्यर्थः ॥ सर्पादेरंतरागमनेतुयमश्राह ॥ सर्पस्यनकुलस्याथअजमार्जारयोस्तथा मूषकस्यतथोष्ट्रस्यमंडूकस्यचयोपितः १ पुरुषस्यैडकस्यापिशुनोऽश्वस्यखरस्यच अन्तरागमने सद्यः प्रायश्चित्तमिदंशृणु त्रिरात्रंह्युपवासश्चात्रिरहश्चाभिषेचनामिति २

किसेके प्रति कहतेहैं ॥ सर्पेति सर्प और नेउल ॥ और बकरा और बिल्ला ॥ और तिसी प्रकार चूहा और तिसी प्रकार ऊठ ॥ और डिड्डू और स्त्री ॥ १ ॥ और पुरुष और भिड्डू और कुत्ता और घोडा अथवा गधा इनके मध्यमें लंघनके विषय तात्काल प्रायश्चित्तनूं श्रवण कर क्याकि तीन रात्र उपवास अर तीन दिन तिन्नां कालांके विषय स्नान करणा २ ॥ इस विषयमें भी दोष और किसी मार्गके विद्यमान होआं जानना जेकर और मार्ग न होवे तां इनके मध्यमें लंघने का दोष नहि ॥

प्रकीर्णेति प्रकीर्णक प्रायश्चित्त करणमें जद समर्थ न होवे तद नवीन सूई होई एक गौका दानकरे जब इसमें भी समर्था न होवे तब एक सौ १०० कौडी दान करे अर शक्तिके अनुसार दक्षिणा देवे ॥ अपणी स्त्रीकों मिथ्यादोषारोपणके विषय यम जीका वाक्यहै स्वभार्यामिति तूं नहि मैथुन करणेके योग्य ऐसें जद पुरुष अपणी स्त्रीको क्रोधतें कथन करे तद ब्राह्मण प्राजापत्य व्रत कों करे अर क्षत्री नो ९ दिन व्रत करे अर वैश्य छे ६ रात्र व्रत करे अर शूद्र तीन ३ रात्र व्रत करे ॥ १ ॥ स्नानतें विना भोजनादिके विषय हारीतजी कथन

एतदपिमार्गांतरसंभवेसतिज्ञेयम्) प्रकीर्णकप्रायश्चित्ताशक्तौ धेनुदानम् ॥ तदशक्तौचूर्णीदानम् ॥ कपर्दिकाशतंचूर्णी यथाशक्ति दक्षिणा स्वभार्याभिशंसनेतुयमः ॥ स्वभार्यांतुयदाक्रोधादगम्येतिनरोवदेत् प्राजापत्यंचरेद्विप्रःक्षत्रियोदिवसान्नव षड्रात्रंतुचरेद्वैश्यस्त्रिरात्रंशूद्रआचरेत् ॥ १ ॥ अस्नातेभोजनादौ हारीतआह ॥ वहन्कमंडलुं रिक्तमस्नातोऽश्नंश्चभोजनम् अहोरात्रेणशुद्धःस्याद्दिनजप्येनचैवहीति ॥ १ ॥ एतच्चा रोगिस्नाने क्लेशदायिस्थानविशेषादिस्नानव्यतिरिक्तेद्रष्टव्यम् एकपंक्त्युपविष्टानांस्नेहादिना वैषम्येण दानादौ यमआह ॥

करतेहैं वहेति ॥ सखणे लोटे नूं धारदाहोआ और स्नानतें विना जो पुरुष भोजन भक्षण करदाहै सो एक दिनरात्र उपवास करणे करके अर दिनके विषय जप करणे करके शुद्ध होताहै ॥ १ ॥ एह प्रायश्चित्त अरोगि स्नान विषें और कष्टदे देणे वालाजो पर्वतादिहै तिसतें विनाग्रहण करणा अर्थात् रोगी पुरुषकों और बरफादि करके युक्तजो स्थानहै उसके विषय दोष नहि ॥ एक पंक्तिके विषें बैठे होए जो पुरुष हैं तिनकों न्यून अधिक घृतादि देणेके विषय यमजी दोष कहतेहैं ॥

नेति एकपंकिके विषे भेदकरके न देवे अर न मांगे अर नकिसीको दुवाए क्यों कि मांगने वाला अर दुवाणेवाला अर देणे वाला एह स्वर्गको नहि प्राप्तहोते अर्थात् नरकको प्राप्त होते हैं और प्राजापत्य अथवा कृच्छ्र व्रतकोंकरके तिसकर्मतें शुद्धहोतेहैं ॥१॥ इसस्थानमें विषम क्या न्यूनताअधिकता भोजनखानवालिओंकी इच्छादे होआं होआं जाननी अर्थात् भोजन खाण वालेको इच्छाहोवे अर वो न देवे तद दोषहै जेकर तृप्त होरएहोण एक न तृप्त होवे तदभी दोष नहि इसीविषयमें शंखजीका वाक्यहै एकेति एकपंकिकेविषे भोजन करदे जो पुरुषहैं तिनाकों जोभेद सें देताहै अर्थात् एककों बहुत एककों थोडा देताहै और जो भेदकरके मांगता है सो पुरुष ब्रह्महत्यारेके व्रत नूं एकपक्ष १५ पर्यंत करे ॥ १ ॥ यमजीका वाक्य है ॥ नदीति

नपंक्त्यांविषमंदद्यान्नयाचेतनदापयेत् याचकोदापकोदातानवैस्वर्गस्य गामिनः प्राजापत्येनकृच्छ्रेणमुच्यंतेकर्मणस्ततः १ विषममत्रसहोपविष्टभोजकांतराकांक्षानिरासे सति वोध्यम् ॥ शंखः ॥ एकपंक्त्युपविष्टानांविषमंयःप्रयच्छति यश्चयाचत्यसौपक्षंकुर्याद्ब्रह्महणिव्रतम् १ याचति याचते ॥ यमः ॥ नदीसंक्रमहंतुश्चकन्याविघ्नकरस्यच समेविषमकर्तुश्च निष्कृतिर्नोपपद्यते ॥ १ ॥ त्रयाणामपिचैतेषांप्रत्यापत्तिंतुमार्गताम् भैक्ष्यलब्धेनचान्नेनद्विजश्चांद्रायणंचरेदिति ॥ २ ॥ संक्रम उदकावरणमार्गः समे पूजादौ ॥ पतितादिसंभाषणे तु गौत्तमआह ॥ नम्लेच्छाशुद्धाधार्मिकैः सहसंभाषेत संभाष्यपुण्यकृतोमनसाध्यायेद्ब्राह्मणेन वासहसंभाषेत

नदीके घाटकों जो ढादेताहै अर कन्याके विवाहादिके विषय विघ्नकों करदा है अर पूजादिके विषयमें विषमता करदा है इनकी शुद्धि नहि होती ॥ १ ॥ इनतीनोंकीशुद्धिदेखणी चाहिए किभिक्षादे अन्नकरके ब्राह्मण अर क्षत्रि अथवा वैश्य चांद्रायणव्रतनूंकरे । २ संक्रमइत्यादिपदोंमें इसीका अर्थस्पष्टकीताहै और पतितादिके संभाषणके विषय गौतमजीका वाक्यहै नेति म्लेच्छ और अशुद्ध औरअधार्मिक इनके साथ धार्मिक पुरुष संभाषण न करे जेकर संभाषण करेतांपुण्यदेकरण वालिआं पुरुषांनूं राजा नल और युधिष्ठिरादिकाकों मनकरके स्मरणकरे अथवा ब्राह्मणके साथ संभाषण करे तो शुद्ध होताहै

म्लेच्छ नाम उसकाहै जो गौका मांसभक्षण करणवाला यवनजाति विशेष होवे और अशुद्ध उसका नामहै जो रजस्वलागमनादिवालाहोवे भार्या और धनके लाभके विघ्न विषय भि न भिन्न वर्षाकों कहतेहैं ॥ इसी स्मृति का अर्थ लिखतेहैं भार्य्येति स्त्री अर अन्न अर धन एह किसीकों प्राप्त होने लगें तिस विषय जो विघ्न करणाहै तिसके विषयमें एक एक वर्ष सामान्य ब्रह्मचर्य लिखाहै अर्थात् इस ब्रह्मचर्य्यमे स्त्री संभोगते विना और कोई विधान नहि चोरादिके दंड त्यागके विषय वसिष्ठजी का वाक्यहै दंडेति राजा चोरादिको जब दंड न देवे तब एक रात्र उपवासकरे अर राजाका पुरोहित तीन ३ रात्र उपवासकरे अर दंडके योग्य नहि जो पुरुष तिसको जब राजा दंडदेवे तब पुरोहित कृच्छ्र व्रत करे अर राजा तीन ३ रात्र उपवासकरे ॥ कुनेति कुनखी कया खोटे नखां वाला अर स्वभाव

म्लेच्छा गौमांसभक्षका यवनविशेषाः अशुद्धाउदक्यादिगामिनः तल्पान्न धनलाभवधे पृथग्वर्षाणीति ॥ भार्यान्नधनानांलाभस्यवधे विघ्नकरणेप्रत्ये कंसंवत्सरंप्राकृतंब्रह्मचर्य्यमित्यर्थः प्राकृतंसामान्य मष्टविधस्त्रीसंभोग त्यागरूपं नतु साविधानम् ॥ चौराद्युत्सर्गादौवसिष्ठः ॥ दंडोत्सर्गेराजैकरात्र मुपवसेत्रिरात्रंपुरोहितः कृच्छ्रम्दंडयदंडे पुरोहितास्त्रिरात्रंराजा कुनखी श्यावदंतश्च कृच्छ्रं द्वादशरात्रंचरित्वोद्धरेयातामिति ॥ दंतान्नखांश्चेत्य भिप्रेतम् ॥ स्तेनपतितादिपंक्तिभोजनेतु मार्कण्डेयः ॥ अपांक्तेयस्ययःक श्चित्पंक्तौभुंक्तेद्विजोत्तमः ॥ अहोरात्रोषितोभूत्वापंचगव्येनशुद्ध्यतीति १

तौंहैं कालिआं दंदां वाला एह दोनों बारां १२ दिन कृच्छ्र व्रत कों करके खोटिआं नखां की अर दंतांकी कृष्णता कों त्यागदेते हैं अर्थात् तिसरोगतें रहित होतेहैं क्योंकि लिखाहै कि स्वर्णके चुराणे वाला कुनखी होताहै अर मदिराके पान करणे वाला श्यावदंतक होताहै इस वास्ते तिनकों प्रायश्चित्त करणा चाहिए ॥ चोर और स्वधर्म त्यागी इत्यादियों की पंक्तिके भोजन विषयमें मार्कंडेयजीका वचनहै ॥ अपामिति पंक्तिके अधिकारतें रहित जो चोरादि हैं तिनके साथ एक पंक्तिके विषय बैठ करके ब्राह्मण और क्षत्री अथवा वैश्य इनके मध्यमें श्रेष्ठ जो पुरुष भोजन करताहै सो एक १ दिन रात्र उपवास रख कर पश्चात् पंचगव्य करके शुद्ध होताहै ॥ १ ॥

भविष्य पुराणमें नीलका दोष लिखाहै ॥ नीलीति नीलके क्षेत्रके बिचों जद अज्ञानतें कदाचित् ब्राह्मण लंघजावे तद एक दिन रात्र उपवासकों करके शुद्ध होताहै ॥ १ ॥ अब नीलकी दातनका दोष कहतेहैं ॥ कुर्य्येति जो पुरुष अज्ञानतें नीलके काष्ठकी दातन करताहै तद सो पुरुष एक दिन रात्र उपवासकों करके पश्चात् पंचगव्य करके शुद्ध होताहै २ ॥ नीलीरसके अंदर जानेमें आप स्तंवजी दोष कहतेहैं रोमेति जब तीनो वर्णों मेंसें किसीपुरुष के रोमकूपोंमें नीलीका रस चला जावे तो सामान्य से तप्तकृच्छ्र व्रत प्रायश्चित्त कहाहै ॥ १ ऊौर ब्राह्मणका पाप तीन ३ कृच्छ्रों कर्के शुद्ध होताहै औरनीलीकी दातनादिकरनेसें ब्राह्मणके

भविष्ये नीलीमध्येयदागच्छेत्प्रमादाद्ब्राह्मणःक्वचित् अहोरात्रोषितोभूत्वा पंचगव्येनशुद्ध्यति ॥ १ ॥ कुर्य्यादज्ञानतोयस्तुनीलीजंदंतधावनम् एकरात्रोषितोभूत्वापंचगव्येनशुद्ध्यति ॥ २ ॥ आपस्तंवः॥ रोमकूपेयदागच्छेद्रसोनील्यास्तुकस्यचित् त्रिवर्णेषुचसामान्यंतप्तकृच्छ्रंविशोधनम् ॥ १ ॥ पातनंचभवेद्विप्रेत्रिभिःकृच्छ्रैर्व्यपोहति ॥ नीलीदारुयदभिंद्याद्ब्राह्मणस्यशरीरतः शोणितंदृश्यतेयत्रद्विजश्चांद्रायणंचरेत् ॥ २ ॥ नीलीरक्तंयदावस्त्रंब्राह्मणोंगेषुधारयेत् अहोरात्रोषिताभूत्वापंचगव्येनशुद्ध्यति ॥ ३ ॥ भृगुः स्त्रीधृताशयनेनीलीब्राह्मणस्यनदुष्यति नृपस्यवृद्धवैश्यस्यपर्ववर्जंविधारणम् ॥ १ ॥ विधिनाधारणंविधारणं नसाक्षात् तदपिपर्वसु संक्रांत्यादिषु न धार्य्यमित्यर्थः ॥

शरीरतेंजब रुधिर निकले तब द्विज अर्थात् ब्रह्मण क्षत्री वैश्यएह चांद्रायणव्रतकों करे तो शुद्धहोताहै २ नीलीति जद नील करके रंगे होए वस्त्रकों ब्राह्मण शरीरके विषय धारण करे तब एक १ दिन रात्र उपवास व्रत कों करके पश्चात् पंचगव्य कर्के शुद्ध होता है ॥ ३ ॥ इसीमें भृगुजीका भी वचन है ॥ स्त्रीति स्त्रीनें धारिआ होआ जो नीला वस्त्रहै स्त्रीकी क्रीडा समयके विषय ब्राह्मणकों तिसका दोष नहि क्षत्री अर वृद्धवैश्यइनकों पंच पर्वोतें बिना विधिकरके नीले वस्त्रका धारणा लिखाहै अर्थात् संक्रांति अर अष्ठमी और द्वादशी और अमावस्या और पोर्णमासी इनपंचपर्वोंमें विधि करके भी नहि धारणा लिखा १

वस्त्रके भेद करके इसका दोष नहि सो दस्रातेहैं ॥ कंवेति कंबलके विषय अर पट्टके वस्त्रके विषै नीलके रंगका दोष नहि अर्थात् नीली कोई अर नीला पट्टका वस्त्र इनके धारणेका दोष नहि ॥ भविष्य पुराणके विषय और भेद कहाहै ॥ शृणुष्वेति किसे ऋषिका किसे राजाके प्रति कथनहै ॥ हे बडीआं भुजांवाले हेगणांके मध्यमे श्रेष्ठ संपूर्णतासें कथन करदा जो मै हां ऐसे मेरेतें नीले वस्त्रके धारणेतें दोषकों श्रवण कर ॥ १ ॥ पालेति नीलका पालना अर नील करके उपजीविका करणी इनोंकर्मों करके ब्राह्मण अर क्षत्री अथवा वैश्य पतितहोताहै अर तीन ३ वर्षों करकें अर्थात् तीनवर्षतक कृच्छ्र व्रतकरणे करके शुद्ध होताहै ॥ २ ॥ उौर प्रकार कथन करतेहैं नीलेति नीले वस्त्रको धार करकें जिस कर्म को

वस्त्रविशेषकृतोपिकश्चित्प्रतिप्रसवो यथा ॥ कंवलेपट्टसूत्रेचनीलीरागो नदुष्यतीति ॥ भविष्येऽपरोविशेषः ॥ शृणुष्वेतिमहावाहोनीलरक्त स्यधारणात् वाससोगणशार्दूलगदतोममकृत्स्नशः ॥ १ ॥ पालना द्विक्रयाच्चैवतद्वृत्तेरुपजीवनात् पतितस्तुभवेद्विप्रस्त्रिभिर्वर्षैर्विशुद्ध्यति २॥ नीलरक्तेनवस्त्रेण यत्कर्म्मकुरुतेद्विजःस्नानंदानंतपोहोमःस्वाध्यायः पितृ तर्प्पणम् ॥ ३ ॥ वृथातस्यमहायज्ञोनीलवस्त्रस्यधारणात् नीलरक्तंयदाव स्त्रंकश्चिद्विप्रस्तुधारयेत् अहोरात्रोषितोभूत्वापंचगव्येनशुद्ध्यतीति ॥ ४ एवमेव केशानिर्म्मितवस्त्रपरिधारणेचोपवासः पंगचव्यंहिरण्योदकंचाधि कमिति केशाश्चात्रोर्णाव्यतिरिक्ताः स्थूलावोध्याः ॥स्त्रीणांक्रीडार्थसंभो गेशयनीयेनदुष्यतीति ॥

करताहै और स्नान और दान और तप और होम और पाठ और पितृतर्पण ॥ ३ ॥ और पंच पूर्व लिखे जो पंच महायज्ञ एह संपूर्ण नीलवस्त्रके धारणेतें तिस पुरुषके वृथाहि होतेहैं और प्रकार कहतेहैं नीलेति नीलेवस्त्रको जदकोई ब्राह्मण धारदाहै तद एक दिन रात्र उप वासको करके पश्चात् पंचगव्यकेपीने करके शुद्ध होताहै ॥ ४ ॥ इसी प्रकारवालांका जो वस्त्र तिसके धारणेमे उपवास और पंच गव्य और स्वर्णका जल इन करके शुद्धि होतीहै ॥ केश पद करके इहां उनके वस्त्रतें विना बकरे आदिके केश ग्रहण करणे स्त्रीयोंकी क्रीडाके अर्थ शय्याके विषय नीले वस्त्रका दोष नहि ॥

सहित छेकके सूर्य ऊोर चंद्रादि ऊोरअशुभ शिवारुतादि इनके दर्शनके विषय शंख जीका वा क्यहै ॥ दुरिति खोटास्वप्न ऊोर उत्पात इनके दर्शनादिके विषय घृत ऊोर स्वर्णदान करे यमजीका वचन है प्रत्येति सूर्यके सन्मुख होकर लघी न करे क्या न मूत्रे अर दिशा वे ढाहोआ अपणे विष्ठेनूं न देखे जबदेखे तद पश्चात् सूर्य ऊोर ब्राह्मण अथवा गौं इनका दर्शनकरे । १ । शंखजीका वाक्यहै ॥ पादेति अग्निके विषय पयरांनूं सेक करके अर पयर से अग्नि नू हिठां दबाकरके अर कुशानाल पयरां नू पूंजकरके एक दिनउपवास व्रत करे॥ १ वृद्धपराशरकाभीएही कथनहै ॥ क्षत्रियादिकों नमस्कारकरणके विषय हारीतजीका वचनहे क्षत्रीति क्षत्रीकों जद ब्राह्मण नमस्कार करे तब एक दिनरात्र उपवास करे अर वैश्यकों नमस्कार करेतद

सछिद्रादित्याद्यरिष्टदर्शनादौ शंखः दुःस्वप्नारिष्टदर्शनादौघृतंहिरण्यंच दद्यादिति ॥ यमः ॥ प्रत्यादित्यंनमेहेतनपश्येदात्मनःशकृत् दृष्ट्वासूर्यं निरीक्षेतब्राह्मणंगामथापिवा ॥ १ ॥ शंखः ॥ पादप्रतपनंकृत्वाकृत्वावाह्नि मधस्तथा कुशैःप्रमृज्यपादौतुदिनमेकंव्रतीभवेदिति ॥ १ ॥ वृद्धपराश रोक्तिरप्येवम् ॥ क्षत्रियाद्यभिवादने हारीतः ॥ क्षत्रियाभिवादनेऽहोरा त्रमुपवसेत् ॥ वैश्यस्याभिवादनेद्वौशूद्रस्याभिवादनेत्रिरात्रमुपवासः॥तथा॥ शय्यारूढपादुकोपानदारोपितपादोच्छिष्टांधकारस्थश्राद्धकृज्जपदेवपूजादि रताभिवादने त्रिरात्रमुपवासःस्यादन्यत्रनिमंत्रितेनान्यत्र भोजनेऽपि त्रिरात्रमिति ॥

दो २ दिन उपवास करे अर शूद्रकों नमस्कार करे तब तीन ३ रात्र उपवास करे तिस प्रकार शय्यादिकोंके ऊपर आरूढ पुरुषकों नमस्कार करणेका दोष कथन करतेहैं शय्येति खट ऊपर जो स्थित होआ होआहे ऊोर पौए ऊोर जोडा एह जिसने पयरोंमेंलाए होए हैं ऊोर जूठाजो है अोर अंधकारविषे जो स्थित है अोर श्राद्ध नूं जो करता हे ऊोर जप ऊोर देव ताको पूजा इत्यादियोंमें जो लगाहुआ है इनके नमस्कार करणेमें तीन ३ रात्र उपवास लि खाहै॥ओर निमंत्रण कीता होआ ऊोर स्थानमें भी जो भोजन करताहे अर्थात् एकस्थानमें भोज न करके ऊोर स्थानमेंभी जो खाताहे तिसकोंभीनमस्कार करणेमें तीन ३ रात्रहिं उपवासलिखाहै

समीति समिधां और पुष्प इत्यादि जिसके हाथमेंहैं तिसकोंभी नमस्कार करणेमें तीन ३ रात्रिहि उपवास लिखाहैं ॥ आपस्तंबस्मृतिमें भी एही लिखाहै ॥ समीति समिधां और पुष्प और कुशा और घृत और जल और मृत्तिका और अन्न और अक्षत एह हैं हाथमें जिसके अर जप और होम नूं करदा जो ब्राह्मण अर क्षत्री अथवा वैश्यहै तिसनूं नमस्कार न करे ॥ १ ॥ जेकर जप आदिकां नूं करदा होआ जो पुरुष नमस्कार नू करदा है तिस पुरुष कों भी एहि प्रायश्चित्त करणा लिखाहै॥जिस प्रकार शंखजी कहतेहैं ॥ नोदेति जलका कुंभहैहाथमें जिसके और मलोत्सर्गादिकर्के अशुद्ध जो है जप और देवताकार्य्य और पितृकार्य्य इनानूं करता होआ और खट्ट उपर आरूढ होआ होआ नमस्कारको नकरे ॥ यज्ञोपवीततें विना विष्ठा और मूत्रके त्यागआदिकांके विषय किसे स्मृतिमें प्रायश्चित्त कहाहै ॥ जैसे ॥ विनेति यज्ञोप

समित्पुष्पादिहस्तस्याभिवादनेऽप्येतदेव समित्पुष्पकुशाज्यांबुमृदन्नाक्षतपाणिकम् जपहोमंचकुर्वाणंनाभिवादेतवैद्विजमित्यापस्तंबीये ॥ जपादिभिःसमभिव्याहारादभिवादकस्यापीदमेवप्रायश्चित्तम् ॥ यथाह शंखः नोदकुंभहस्तोऽभिवादयेन्नाशुचिर्नजपन्नदेवपितृकार्य्यंकुर्वन्नशयानइति ब्रह्मसूत्रंविनाविण्मूत्रोत्सर्गादौस्मृत्यंतरे प्रायश्चित्तमुक्तम् ।यथा। विनायज्ञोपवीतेनयद्युच्छिष्टोभवेद्द्विजः प्रायश्चित्तमहोरात्रंगायत्र्यष्टशतंतुवा १। तत्रऊर्ध्वोच्छिष्टे उपवासअधउच्छिष्टेऽन्नभक्षणउदकपानेचगायत्रीजपइति व्यवस्था ।भोजनेनोर्ध्वोच्छिष्टोविण्मूत्रोत्सर्गेणाधउच्छिष्टोभवतीत्यर्थः । अकामतस्तु ॥ पिबतोमेहतश्चैवभुंजतोऽनुपवीतिनः प्राणायामत्रिकंषट्कं नक्तंचत्रितयंक्रमादिति स्मृत्यंतरे ॥

वीततें रहित ब्राह्मण अर क्षत्री अथवा वैश्य उच्छिष्ट जद होवे अर्थात् भोजनादि कर्के अपवित्र होवे तद एक १ दिन रात्र उपवास अथवा एक १ सौ १०० अठ ८ वार गायत्री नूं जपे ॥ १ तिसके विषय एह व्यवस्थाहै कि जब भोजनकर्के उच्छिष्ट होवे तब एक दिनरात्र उपवासकरेअर जब विष्ठा और मूत्रकों त्यागकर और विनाशौचते अन्न भक्षण और जलकापान करे तब गायत्रीका जप करे इति ॥ भोजनखाकर ऊर्द्धोच्छिष्ट होताहै और विष्ठा और मूत्रको त्यागकर अधउच्छिष्ट होताहै॥ जब इच्छा सें न करे तिस विषय कहतेहैं ॥ पिबेति यज्ञोपवीतेंरहित जो जलादिकापान करदाहै तिसकों तीन ३ प्राणायाम करणे लिखेहैं अर विष्ठा और मूत्र नूं जो त्यागताहै तिसको छे ६ प्राणायाम लिखेहैं अर भोजननूं जो करदाहै तिसको नक्त व्रत त्रय लिखेहैं एह भी किसीस्मृतिमें कहाहै ॥ १ ॥

जो वृद्धपराशर जीने कहाहै सो इच्छा सें कीता जो अभ्यास तिसविषयमें है क्योंकि यज्ञोपे ति ब्राह्मण और क्षत्री अथवा वैश्य यज्ञोपवीततें विना भोजन करताहै अथवा मूत्र और पुरीष और वीर्य इनानूं त्यागताहै ॥ १ ॥तव ब्राह्मण तीन ३ रात्र उपवास करे अर क्षत्री कृच्छ्र व्रत का एक १ पाद करे अर्थात् चौथाहिस्सा कृच्छ्रव्रतका करे अर वैश्य एक १ दिनरात्र उपवासकरे इहशुद्धि सनातनीहै सो एहकामनातेवहुवारकरणेमेंहै। २। अन्नखाकर्के शुद्धिके वास्ते आचमननूं नकरके उठणके विषय पराशरजीहि कहतेहैं यदिति जदभोजननूं खाकर अर आचमन नूं नकर्के जोपुरुष आसनतें उठवैंदाहै तिसतें उपरंत सो पुरुष शुद्धिके अर्थ तात्काल स्नाननूं करे जेकर स्नान न करे तद प्रायश्चित्ती होताहै ३॥ नित्ययज्ञादिके न करणेमें आचारमाधवीयमें प्रजापतिने

यत्तु वृद्धपराशरः।यज्ञोपवीतेनविनाभोजनंकुरुतेद्विजःअथमूत्रपुरीषेवारेतः सेचनमेववा १ ॥त्रिरात्रोपोषितोविप्रःपादकृच्छ्रंतुभूमिपः अहोरात्रोषितोवैश्यःशुद्धिरेषासनातनीति। २। तत्कामताभ्यासे ॥ भुक्ताशौचार्थाचमनम कृत्वोत्थानेतुसएव ॥ यद्युत्तिष्ठेदनाचांतोभुक्तवानासनात्ततः सद्यःस्नानं प्रकुर्वीतसोऽन्यथाप्रयतोभवेदिति। ३ प्रयतीप्रायश्चित्ती। नित्ययज्ञाद्यकरणेतुआचारमाधवीयेप्रजापतिः ॥ दर्शंचपौर्णमासंचलुप्त्वाथोभयमेवच एकस्मिन्कृच्छ्रपादेनद्वयोरर्द्धेनशोधनम् १ ॥ हविर्यज्ञेप्यशक्तस्यलुप्तमप्येकमादितः प्राजापत्येनशुद्ध्येतपाकसंस्थासुचैवहि २ विधानपारिजातेएकविंशतिसंस्थागणनायां अष्टकापार्वणश्राद्धश्रावण्याग्रहायणीप्रौष्ठपदीचैत्र्याश्वयुजीतिसप्तपाकयज्ञसंस्थाः अग्न्याधेयाग्निहोत्रदर्शपौर्णमासाग्रयणचातुर्मास्यनिरूढपशुबंधसौत्रामणीति सप्त हविर्यज्ञसंस्थाः ॥ अग्निष्टोमात्यग्निष्टोमोक्थ्यषोडशीवाजपेयातिरात्राप्तोर्यामेति सप्त सोमसंस्थाः।

कहाहै दर्शमिति दर्श अथवा पौर्णमास यज्ञ नूं जो नहि करदा तिसकों कृच्छ्रव्रतका एक पाद करणा लिखाहै जो पुरुष दोनों कों नहि करदा तिसको आधा कृच्छ्र करणा लिखाहै॥ १ ॥ जो पुरुष हविर्यज्ञके विषय असमर्थहै अर आदेतेलेकर एकभी हविर्यज्ञ जिसका लोपहोगिआहै सो पुरुष प्राजापत्य व्रतकर्के शुद्ध होताहै इसी प्रकारपाक संस्थाके विषय जान लैणा॥ २ ॥ इसमे विधानपारिजातका वचनहै विधेति अग्न्याधेय १ और अग्निहोत्र २ और दर्शपौर्णमास ३ और आग्रयण ४ और चातुर्मास्य ५ और निरूढपशुबंध ६ और सौत्रामणी ७ एह सप्त हविर्यज्ञसंस्थाकहै पाकसंस्था क्याहै कि अष्टकाश्राद्ध १ और पार्वण श्राद्ध २ और श्रावणी ३ और आग्रहायणी ४ और प्रौष्ठपदी ५ और चैत्री ६ और आश्वयुजी ७ एहसप्तपाकयज्ञसंस्थाहैं

संध्योति संध्योपासन और नित्यस्नान और होम और नित्यकर्म इनके भी नाश होआं होआं शुद्धि के वास्ते अठहजार ८००० गायत्रीका जप करे ॥ ३ ॥ सेति अग्निष्टोम १ और अत्यग्निष्टोम २ और उक्थ ३ षोडशी ४ और वाजपेय ५ और अतिरात्र ६ और आप्तोर्याम ७ एहसत यज्ञ सोमसंस्था हैं वर्षके अंतमे सोमयज्ञांके नाशदे होआं होआं चांद्रायण व्रत नूं करे और अधिकारहोणेतें इन यज्ञांके मध्यमे एक किसी नूं भी न करके उपवास व्रत करके शुद्ध होताहै पाकसंस्थाके विषय भी इसी प्रकार जाण लैणा ॥ ४ ॥ कात्यायनजीका वचनहै पित्रिति पितृ यज्ञके नाशके विषय अर्थात् पितृतर्पणके नकीतिआं होआं और वैश्वदेव बलिके नकीतिआं होआं और नवें अन्नके भक्षण समयके विषय नवयज्ञ करके नपूजन करके और तिसी प्रकार पतितके अन्न का भक्षण करके शुद्धिके वास्ते चातुर्वैश्वानरी इष्टि नूं करे ॥ १ ॥ बोधायनजीका वाक्यहै यस्येति जिस पुरुषके

संध्योपासनहानौतुनित्यस्नानेप्रलोप्यच होमंचनैत्यकंशुद्धैगायत्र्यष्टसहस्रकम्३ समांतेसोमयज्ञानांहानौचान्द्रायणंचरेत् अकृत्वान्यतमंयज्ञंयज्ञानामधिकारतःउपवासेनशुध्येतपाकसंस्थासुचैवहीति ४ कात्यायनः। पितृयज्ञात्ययेचैववैश्वदेवात्ययेपिच अनिष्ट्वानवयज्ञेननवान्नप्राशनेतथाभोजनेपतितान्नस्यचातुर्वैश्वानरोभवेत् १ चातुर्वैश्वानरीमिष्टिंकुर्यादित्यर्थः ॥ बौधायनः ॥ यस्यानित्यानिलुप्तानितथैवागंतुकानिच विपद्यपिनसस्वर्गंगच्छेताऽऽपतितोहिसः१ तस्मात्कंदैःफलैर्मूलैर्मधुनाप्यरसेनवा नित्यंनित्यानिकुर्वीतनचनित्यानिलोपयेदिति २ ऋतौस्वपत्न्यगमनेतुविष्णुः। पर्वाऽनारोग्यवर्जंऋतावगच्छन्पत्नींत्रिरात्रमुपवसेदिति अत्र पर्वपदं ब्रह्मचर्यादिलोपोपलक्षकम् ऋतूरजःस्नानादिनादारभ्यद्वादशादिनानि

आपदा काल विषय भी नित्यकर्म अर्थात् पंचयज्ञ और आगंतुककर्म नष्ट होगयेहैं सो पुरुष स्वर्ग नूं नहि प्राप्त होता किंतुचारे और तें पतित होताहै ॥ १ ॥ तिस कारणतें कंद और फल और मूल और मधु और घृत और रस इनों करके दिन दिन प्रति अवश्यनित्यकर्मां नूं करे कदे भी नित्यकर्मांका नाश न करे ॥ २ ॥ ऋतुसमयके विषय अपणी स्त्रीके अगमनके विषय विष्णुजी का वचनहै पर्वेति संक्रांत्यादि पंच पर्व और रोग इना नूं वर्जित करके ऋतुसमयके विषय जो पुरुष अपणी स्त्रीके साथ मैथुन नाहि करदा सो तीन ३ रात्र उपवास करे अर्थात् पंचपर्व और रोग इनके विषय ऋतुकालमें भी न गमन करे इस स्थानमे पर्व पद करके ब्रह्मचर्य और व्रतादि इनाके लोपका भी ग्रहण करणा अर ऋतुपद करके क्या लैणा कि स्नानदिनतें आद लैकर बारां १२ दिनपर्यंत ग्रहण करणा ॥

जो संवर्तजीने कहाहे सो अकामके विषयमेहै अर्थात् उसकों कामनाथी परंतु किसे कार्य्यवशाथे गमन नहिहोया इसवास्ते थोडा प्रायश्चित्तकहाहै ऋताविति जो पुरुष ऋतुकालके विषय व्रतके आचरण करणवाली अपणी स्त्रीमे गमन नहिकरदा नियमके अतिक्रमकेभयतें तिस पुरुषकों एकसौ १०० प्राणायाम कथनकीताहे । १ । एह वाक्य निकट देशकेविषय रहणे वालेपर ग्रहण करणा अर दूर देशके विषय स्थित होवे तव दोष नहि क्योंकि मिताक्षरामें कहाहे ऋत्विति समीपकेविषये निवास करदा होआ जो पुरुष ऋतु स्नात अपणी स्त्रीमेगमन नहि करदा सो पितरांके सहित वडी जो गर्भकी हत्याहै अर्थात् गर्भ हत्या वाला जो नरक है तिसमें डूवताहे ।२। इसवचनतें स्त्रीकोंभी ऋतुकालके विषयमें भर्ताके समीप न प्राप्तहोणका एहि प्राय

यत्तुसंवर्त्तः।ऋतौनोपैतियोभार्य्यांनियतांव्रतचारिणीं नियमातिक्रमात्तस्यप्राणायामशतंस्मृतमिति तदकामतः १ ॥ एतच्चसमानदेशविषयम् ॥ ऋतुस्नातांतुयोभार्य्यांसन्निधौनोपगच्छति घोरायांभ्रूणहत्यायांपितृभिःसह मज्जतीतिमिताक्षरावचनात् २ ऋतौभर्त्तुरनुपसर्पणेस्त्रिय अपि एतदेव प्रायश्चित्तम् ॥ तस्याअपिनारदीयेदोषश्रवणात् ॥ आहूतायातुवैभर्त्रानोपयातित्वरान्विता साध्वांक्षीजायतेपुत्रदशवर्षाणिपंचचेति ॥ १ ॥ तासुतुस्त्रीत्वादर्द्धम् ॥ अंगिराः ॥ अनापदिचरेद्यस्तुसिद्धांभिक्षांगृहेवसन् दशरात्रंपिवेद्वज्रमापत्कालेत्र्यहंद्विजः ॥ १ ॥ वज्रंवज्रकृच्छ्रसंवंधिद्रव्यमित्यर्थः देवादीनामाभिमुख्येनिष्ठीवनादौ सुमंतुः ॥

श्चित्त लिखाहै १ तिसकोंभी नारदीयपुराणकेविषय दोषकेश्रवण करणेतें सोकहतेहैं आहूतेति ऋतुकालके विषय भर्ता करके वुलाई होई जो स्त्री शीघ्र नहि प्राप्तहोती है पुत्र सोस्त्री पंदरां १५ वर्ष तककाकयोनिमें प्राप्त होतीहै ।१। परंतुस्त्रीभावहोणेनें तिनांके विषय अद्धा प्रायश्चित्त लिखाहै अंगिराजीकावाक्यहै अनेति आपदाकालतें विनागृहके विषय निवास करदाहोआ जोपुरुष सिद्ध भिक्षाका आचरण करदाहै सो दश १० रात्र वज्रकृच्छ्र व्रतके विषय लिखेजो वस्तुहे तिसकापानकरे जब आपदाकालके विषय व्राह्मण और क्षत्रीअथवा वैश्यभिक्षाका आचरणकरे तव तीन ३ दिनपीवे १ । देवादिकोंके सन्मुख थुकणादिकांके विषयमें सुमंतुजीका वचनहै

देवेति देवता और ऋषि और गो और ब्राह्मण और गुरु और माता और पिता और राजाइ नके सन्मुखजोथुकेऔरझूठकहे सोअग्निकर्के जिह्वानूं साडदेवे औरस्वर्णदानकरे परंतु तिवना जिह् वानूंसिकदेवे जितने करके जीवतारहे एह जानलेणा। जनांका निवास स्थान और बाग और देवताका मंदिर इत्यादिके ढाणके विषयमें काश्यपजीका वचनहै वापीति बावली और खूह्या और बाग और पुल और वेल और तला और नदी आदिकोंका कनारा और देवताका स्थान इनके ढाणके विषयमें ब्राह्मणांके तांई प्रायश्चित्त दस करके अर्थात् तिनांते पुछकर्के पश्चात्चार ४ घृतकीआं आहुतीआंका हवन करे आहुतीआं दखावतेहैं इदमिति(इदं विष्णु) इसमंत्र करके पहली आहुति करे (मानस्तोक)इसकरके दूसरी आहुति करणी अर (विष्णोःकर्माणि)इस कर

देवर्षिगोब्राह्मणाचार्य्यमातृपितृनरेंद्राणां प्रतिष्ठीवने आक्रोशने च जिह्वांदहेद्धिरण्यंदद्यादिति ॥ दाहोजीवनाविरोधेन ॥ मंडपोद्यानदे वतागारादिभेदे ॥ काश्यपः ॥ वापीकूपारामसेतुलतातडागवप्रदेवता यतनभेदनेप्रायश्चित्तंब्राह्मणेभ्योनिवेद्य ततश्चतस्त्र आज्याहुतीर्जुहुयात् इदंविष्णुरितिप्रथमाम् मानस्तोक इतिद्वितीयाम् पादोस्यांत्यामितिचतु र्थीम् ॥ देवतामुच्छेदयति तस्यैदेवतायै ब्राह्मणान्भोजयेदिति ॥ एत च्चाल्पोपघाते ॥ महत्युपघातेऽभ्यासेच प्राजापत्यादि कल्पनीयम् देव ताचात्रमृण्मयीपूजिताऽपूजिता वा ग्राह्या प्रायश्चित्तस्याल्पत्वात् अन्य त्रतु दंडगौरवदर्शनेन प्रायश्चित्तं कल्प्यम्

के तीसरी अर(पादोस्यांत्यां) इस करके चौथीआहुति करणी जो पुरुष देवताकी मूर्तिकों छेद ताहै सो तिस देवताके वास्ते ब्राह्मणानूं भोजन खुवाए एह प्रायश्चित्त थोडे नाशके विषय जानना अर जब बहुत छेदनकरे अर तिसीमें बहुत अभ्यासकरे तब प्राजापत्यादि व्रतकों करे। इस स्थानमें देवता मृत्तिकाकी पूजी होई अथवा न पूजी होई ग्रहण करणी प्रायश्चित्तकों थोडा होणेतें औरजगां दंडको बडा देखणे करके प्रायश्चित्त वडा कल्पनाकरणा क्योंकि दंडकी न्याईप्रायश्चित्त होताहै इसवचनतें अर्थात् थोडा पापहोवेतां थोडा प्रायश्चित्त अर बहुतपापहोवें तां बहुत प्रायश्चित्त दस्सणा ॥

तिसप्रकार इसके विषय दंडकीगौरवताकों कात्यायनजी कहतेहैं हरेदिति जोदेवताकी प्रतिमाकों जव चुरालये अर खंडित करदेवे अर दग्धकरदेवे अर देवताके स्थानका भेदन कर देवे तव सो पुरुष उत्तम दंड कों प्राप्तहोवे ॥ १ तीन ३ प्रकारका दंड याज्ञवल्क्यजीने लिखाहै उत्तमदंड १ और मध्यमदंड २ और अधमदंड ३ जो एक हजार १००० और अस्सी ८० पैसे चढे हैं सो उत्तमदंडहै अर इसते आधा मध्यमदंड हैं अर इसतेंभी आधा अधम दंड हैं ॥ इति ॥ विष्णुजीका वाक्यहै अभेति थोमादि और नहि वेचने योग्य जो वस्तु इनके वेचने वाला और

दंडवत्प्रायश्चित्तंभवतीतिवचनात्) तथाऽत्रदंडगौरवमाहकात्यायनः हरे च्छिद्याद्दहेद्वापिदेवानांप्रतिमांयदि तद्गृहंचैवयोभिंद्यात्प्राप्नुयात्पूर्वसाहसम् १ विष्णुरपि ॥ अभक्ष्यस्याविक्रेयस्यचविक्रयी प्रतिमाभेदकश्चोत्तमसाहसंदं डनीयः ॥शंखलिखितौ ॥ प्रतिमारामसंक्रमध्वजसेतुनिपातनभंगेषु तत्समु त्थापनंप्रतिसंस्कारोऽष्टशतंचेति कूपादिसमीपेऽल्पजलाशयोनिपातनम् यद्वाप्रतिमादीनांनिपातनेभंगेचसति ॥ निपातनेतत्समुत्थापनंभंगेप्रतिसं स्कारइत्यर्थः ॥ मनुः ॥ संक्रमध्वजयष्टीनांप्रतिमानांचभेदकः ॥ प्रति कुर्य्याच्चतत्सर्वंपंचदद्याच्छतानिच ॥ १ ॥

देवताकी मूर्त्तिके छेदने वाला एहदोनों उत्तम दंडके योग्यहैं इसी विषयमें शंख और लिखि तका भी वचनहै प्रतीति देवताकी मूर्त्ति और वाग नदी तला आदिक पत्तन औरपुल और कूप दिके समीप छोटा जिआ जलका स्थान इनके भेदन करणे वाला तिनानूं फेर नवीन वणावे अथवा पांचसौ ५०० पयसा दान करें ॥ इसीवाक्यमे मनुजीने भी लिखाहै ॥ संक्रांति जलका घाट और धजा और लाठी और देवताकी छोटी जैसी मृत्तिकादि मूर्त्ति इनके छेदन क रणे वाला इनां संपूर्णां नूं नवीन वणावे अथवा पांचसौ ५०० पण दान करे ॥ १ ॥

सामितिसंक्रम इत्यादि पदोंमें इसी श्लोककाहि अर्थ स्पष्ट कीताहै इसस्थानमें प्रतिमाके छोटे बडे भेद करकेअर प्रतिमाके छोटे बडे छेदनके भेद करके दंड औंर प्रायश्चित्तकाभी भेद जानना अर्थात् थोडा छेदन करे तां थोडा दंड अथवा प्रायश्चित्तकरे जेकर वहुता छेदनकरे तां वहुत दंड अथवा प्रायश्चित्त करे एह व्यवस्थाहै ॥ दारिद्यादिकरके भर्ताके निरादरके विषय आपस्तंवजीका वाक्यहै भर्तु रिति निर्धनता औंर क्रोध औंर चुगली इत्यादि करके भर्ताका जवस्त्री निरादर करे तव कृच्छ्र व्रत करे इति ॥ पर्वके विषय मैथुन करणेका दोष विष्णु पुराणमें लिखाहै ॥ किसे ऋषिका किसे राजाके प्रतिवचनहै हे राजन् चतुर्दशी १ औंर अष्टमी २ औंर अमाव

संक्रमोजलोपरिगमनार्थंकाष्ठशिलादिरूपःध्वजश्चिह्नंराजद्वारादौ यष्टिः पुष्करिण्यादौ प्रतिमाश्च क्षुद्राश्मण्मय्यादयः एतद्भेदकःपुनर्नवंकुर्य्यात् पणानांपंचशतानिचदद्यात् ॥ अत्रच प्रतिमातारतम्येन तद्भेदतारतम्येन दंडप्रायश्चित्तयोर्व्यवस्था ॥ दारिद्यादिना भर्तुरतिक्रमे आपस्तंवः भर्त्तुरतिक्रमेकृच्छ्रइति ॥ अतिक्रमोदारिद्यक्रोधमात्सर्य्यादिनाऽवमाननम् पर्वणिमैथुनेविष्णुपुराणे।चतुर्दश्यष्टमीचैवअमावास्याथपूर्णिमा पर्वाण्येतानिराजेन्द्ररवेः संक्रांतिरेवच १ स्त्रीतैलमांससंभोगीपर्वस्वेतेषुयोनरः विण्मूत्रभोजनंनामप्रयातिनरकंमृतः २ अस्यप्रतिप्रसवः ॥ शनिषष्ठ्यांस्मृतं तैलंमहाष्टम्यांपलाशनम् तीर्थेक्षौरंचतुर्दश्यांदीपावल्यांचमैथुनम् ॥ १ ॥ महाष्टमी आश्विनशुक्लाष्टमी ॥

स्या ३ औंर पूर्णमासी ४ औंर सूर्यकी संक्रांति ५ एह पंच पर्वहैं ॥ १ ॥ इनोंके विषय जो पुरुष स्त्री औंर तेल औंर मांस इनानूं भोगताहै सो मरकरके विष्टा औंर मूत्रहैं भोजन जिसके विषय ऐसे नरकको प्राप्त होताहै ॥ २ ॥ इसका भिन्न भिन्न दोष निवारणकहतेहैं शनीति ॥ शनिवार षष्ठीके विषय तेल मले अर आश्विनके शुक्ल पक्षकी अष्टमीके विषय मांस भक्षणकरे अर तीर्थके विषय चतुर्दशीके दिन क्षौर कराए अर दिवालीके विषय मैथुन करे तौभी इसी नरकको प्राप्तहोताहै ॥ १ ॥

और किसे स्मृतिकाभी वाक्य है अष्टेति अष्टमी ८ और चतुर्दशी १४ और दिन और पर्व इनके विषय मैथुन कों करके सहित वस्त्रांके स्नान नूं करके पश्चात् वरुण है देवता जिनां का तिनां मंत्रों करके मार्जन करे ॥ १ ॥ उलटीके विषय शातातप जीका वाक्य है विच्छेति ब्राह्मण और क्षत्री और वैश्य इनकी उलटीके विषय और भन्ने होए पात्रक विषय भोजन करणेके विषय पंच गव्य करके शुद्धि होतीहै ॥ १ ॥ मांसादिके वमनके विषय यमजी विशेष कहतेहैं ॥ मसूरेति जो ब्राह्मण अर क्षत्री अथवा वैश्य मसर और मांह और मांसको भक्षण करके उलटी करताहै तिसकों तीन ३ रात्र उपवास प्रायश्चित्त करणा लिखाहै अर स्नान करके अर तीन ३ प्राणायामों करके अर घृतका भक्षण करके शुद्ध होताहै ॥ १ ॥ यज्ञोपवीतादियोंके नाशके विषय भी यम

स्मृत्यंतरे अष्टम्यांचचतुर्दश्यांदिवापर्वणिमैथुनम् कृत्वासचैलंस्नात्वाचवारुणी भिश्चमार्जयेदिति १ वारुणीभिर्वरुणदेवताकेऋग्भिरित्यर्थः।वमनेशातातपः विच्छर्दनेद्विजातीनांभिन्नभांडेचभोजने पंचगव्येनशुद्धिःस्यादितिशातातपो ऽब्रवीत् १ मांसादिवमनेतुविशेषमाह यमः॥ मसूरमाषमांसानिभुक्त्वावावम तिद्विजः त्रिरात्रमुपवासोऽस्यप्रायश्चित्तंविधीयतेप्राणायामैस्त्रिभिः स्नात्वा घृतंप्राश्यविशुद्ध्यति १ यज्ञोपवीतादिनाशेपि सएव मेखलादंडाजिनयज्ञोप वीतावपातेषु मनोव्रतवतीभिःसप्तआज्याहुतीर्जुहुयात्पुनर्यथार्थंप्रतीयात् असकृद्भैक्ष्यभोजनेऽभ्युदितेऽभिनिर्मुक्तेवांतेदिवास्वप्नेनग्नस्त्रीदर्शनेनग्नस्वापे श्मशानमाक्रम्यहयादींश्चारुह्यपूज्यातिक्रमेचैताभिरेवजुहुयादग्निसामिधने

जीनेहि प्रायश्चित्त लिखाहै ॥ मेखेति तडागी और दंड और चर्म और यज्ञोपवीत इनके नाशके विषय मनोव्रतवती इत्यादि मंत्रों करके घृतकीआं सत ७ आहुतीआं करके पश्चात् मेखलो दिकों धारणाकरे अर अनेकवार भिक्षाकों भोजन करणा और जिसके सुतिआं होआं सूर्य उदय होताहै अर जिसके सुतिआं होआं अस्त होताहै उलटी होणी और दिनके विषय सौना और नग्नस्त्रीकों देखणा और नग्न सौणा और श्मशान भूमिके विचों लंघना और घोडे आदि कोंके उपर चडकर और महात्माकों उलंघन करणा अर्थात् तिनकी आज्ञाकों नहि म ननां अथवा विना नमस्कारके चलेजाणा इन संपूर्णोंके विषयमें बलदी अग्निके विषय मनो व्रतवती इत्यादि सत मंत्रों करके आहुतीआं करे॥ ॥

स्थेति वृक्षादि और माहिष्यादिकी हिंसाकरणेकेविषें (यद्देवादेवहेडनं) इत्यादि जो कूष्मांड संज्ञिकमंत्रहैं इनोंकरके घृतका होमकरे ॥ मणि और वस्त्र और गौ और स्वर्ण इत्यादियोंका दानलैकरके गायत्रीका अठ हजार ८००० जपकरे इति ॥ अर्थः (मनोजूतिर्जुषतां) इत्यादि मंत्रों करके अर (त्वमग्नेव्रतपाअसि) इत्यादिमंत्रोंकरके होमकरे अर यथार्थक्या उपनयन विधि करके सहितमंत्रांके यज्ञोपवीतका ग्रहणकरे ॥ अभ्युदितादिके स्वरूप नूं यमजी कथन करतेहैं ॥ सूर्य्येति जो पुरुष सूर्यके उदयहोआं होआं सुत्तारहिताहे तिसको अभ्युदित कहतेहैं अर जोपुरुष सूर्यके अस्त होआं होआं सुत्ता रहिताहै तिसको निर्मुक्त कहतेहैं ॥ १ ॥ अभ्युदितके विषय प्रायश्चित्त नूं भी यमजी कहतेहैं ॥ अजीर्णेति अन्नका नपचना और अभ्यु

स्थावरसरीसृपादीनांवधे यद्देवादेवहेडनमितिकूष्मांडीभिस्त्रिरात्रमाज्यंजुहुयान्माणिवासोगवादीनांचप्रतिग्रहे गायत्र्यष्टसहस्रंजपेदिति मनोजूतिर्जुषतामितिमनोलिंगाभिः त्वमग्नेव्रतपाअसीतिव्रतलिंगाभिश्च यथार्थमुपनयनोक्तेनविधिनासमंत्रकं प्रतीयाद्गृह्णीयात् । अभ्युदितादिस्वरूपमाहयमः। सूर्योदयेतुयश्शेते ससूर्योदितउच्यते अस्तंगतेतुयःशेतेसूर्येनिर्मुक्त एवसः १ अभ्युदितेप्रायश्चित्तमाहसएव अजीर्णेऽभ्युदिते वांतिश्मश्रुकर्माणि मैथुनेदुःस्वप्नेदुर्जनस्पर्शेस्नानमात्रंविधीयते ॥ २ ॥ अत्रैवकामतोगौत्तमः सूर्याभ्युदितेब्रह्मचारीतिष्ठदहन्यभुंजानोऽस्तमितेरात्रौसावित्रींजपेत् । अभ्यासेत्वावृत्तिरूह्या। गर्भाधानादिसंस्कारातिपत्तौतु आश्वलायनः। आरभ्याधानमाचौलात्कालातीतेतुकर्मणाम् व्याहृत्याज्यंसुसंस्कृत्यहुत्वाकर्म यथाक्रमम् ॥ १ ॥ एतेष्वेकैकलोपेपि पादकृच्छ्रंसमाचरेत् ॥

दित और उद्वमन और थोडा क्षौर कर्म और मैथुनकरणा और खोटास्वप्न और दुष्ट पुरुषके साथ स्पर्शकरणा इनकेविषयस्नानहि विधानकीताहै ॥ २ ॥ इसकेविषयहि कामनाकेविषयमें गौत्तमजी कावाक्यहै सूर्य्येति अभ्युदितके विषय दिनके विषय अन्नकों न भक्षण करदाहोआ अष्टांगमैथुनतेंरहितहोकर स्थितहोवे सूर्यकेअस्तहोआंहोआं रात्रिके विषय गायत्री नूं जपे इसोंके अभ्यास केविषयमें एहीप्रायश्चित्त दोवारकरे इति ॥ गर्भाधानादिसंस्कारके नाशके विषय आश्वलायनजीका वाक्यहै आरेति गर्भाधान कर्मतें लेकर चौलकर्म पर्यंत कर्मोंका कथनकीता जो काल है तिसके वीतिआंहोआं व्याहृतीआं करके हछी तरां संस्कारकों करके क्रमसें घृत करके होमनूं करे १ इनकर्मोंके मध्यमे एककर्मकेभी नाश होआं होआं एक पाद कृच्छ्र व्रतको करे ॥

चूडेति चूडा कर्मके नाशके विषय आधा कृच्छ्रव्रतकरे आपदासमय मेंभीएहि करणा अर जब आपदा न होवे अर संस्कार कर्मका नाशहो जावे तब संपूर्णस्थानके विषय दूणा प्रायश्चित करे ॥ २ ॥ इसीमें कात्यायन जी भी कहतेहैं ॥ लुप्त इति संस्कार कर्मके नाशके विषय संपूर्णस्थानके विषय प्रायश्चित्त करे अर प्रायश्चित्तके कीतिआंहोआं पीछेसें नाश होए कर्म नूं करे ॥ १ ॥ त्वन्नइति(त्वन्नःसत्वन्न)इनांमंत्रांकरके और तिसप्रकार(इमंमे)इसमंत्रकरके आहुतीआंनूं करे अर(येतेशतमयाश्चाभ्यामुदुत्तमम्रुचा)इत्यादिऋचा करकेहोम नूंकरे २ ॥ हुत्वेति भिन्न भिन्न हवन नूं करे पश्चात् कृच्छ्रव्रत का एकपादकरे अर चौल कर्मके विषय आधो कृच्छ्रव्रतकरे स्त्रीआंकां भी इसीप्रकार मंत्रांकर्के जातादि कर्म करणा ॥ ३ ॥ गर्भाधान कर्मके न करणे के विषय

चूडाया अर्द्धकृच्छ्रः स्यादापदीत्येवमीरितम् ॥ अनापदितुलुप्तेतुसर्वत्रद्विगुणंचरेत् २ ॥ कात्यायनोपि ॥ लुप्तेकर्मणिसर्वत्रप्रायश्चित्तंविधीयते । प्रायश्चित्तेकृतेपश्चाल्लुप्तंकर्मसमाचरेत् ॥ १ ॥ त्वन्नःसत्वन्नइत्याभ्यां इमंमेतुतथाहुतीः येतेशतमयाश्चाभ्यामुदुत्तममृचाहुतीः ॥२॥ हुत्वापृथक् पृथक्पादमर्द्धंचौलेसमाचरेत् स्त्रीणामप्येवमेवस्याज्जाताद्यामंत्रिकाक्रियेति ॥३ ॥ गर्भाधानाकरणआश्वलायनः ॥ गर्भाधानस्याकरणेतस्यांजातस्तुदुष्यति अकृत्वागांततोदत्त्वाकुर्यात्पुंसवनंपतिरिति ॥ १ ॥ क्षुताद्यौवृद्धपराशरः विप्रः क्षुत्कृत्यनिष्ठीव्यकृत्वाचानृतभाषणम् वचनंपतितैःकृत्वादक्षिणंश्रवणंस्पृशेत् प्रेक्षणंशशिनोऽर्कस्यब्रह्मेशहरिसंस्मृतिः ॥१॥ एतच्चजलाभावेकर्मण्यापृतेवा अतएव वृद्धशातातपः ॥

आश्वलायनजी का वाक्यहै । गर्भेति ॥ जिस स्त्रीका गर्भाधानसंस्कार नाहि कीआ तिसकेविखों उत्पन्न होआ बालक दुष्ट होताहै अर गर्भाधान संस्कार नूं नकरके तिसतें उपरंत गोदान करके पश्चात्- भर्त्ता पुंसवन संस्कारकों करे ।१। छिक्यादिकांकेविषय वृद्धपराशरजी का वचनहै विप्रइति छिक और थुक और झूठ वचन और पतितांके साथ वार्त्ताइनां नूं करके ब्राह्मण सज्जे कांन नूं हाथ लगावे और चंद्रमा अर सूर्यका दर्शन करे और ब्रह्मा और शिवजी और विष्णु इनका स्मरण करे ।१।एह वार्ता कबकरे जब पासजल नहोवे अथवा किसी कामम्मे लगा होआ होवे ॥ इसी कारणतें वृद्धशातातपनें कहा है ॥ ॥

क्षुत्वेतिं छिकमार करके और थूक करके और वस्त्र कों पहिर कर बुद्धिमान् पुरुष आचमन करे अथवाब्राह्मणकों स्पर्श करे अथवा गोकी पिठका दर्शनकरे॥१॥यथेति जिस प्रकार एह कथन कीतेहैं तिस प्रकार प्रथमके अभावमें अगले कों ग्रहण करे प्रथमके नाशमें दूसरेकी प्राप्ति इच्छित है अर्थात् जलके अभावमें ब्राह्मण कों स्पर्श करे अर ब्राह्मणके अभावमें गौका दर्शन करे॥ २॥ संवत्सर कर्मके नाशके विषय विष्णु पुराणमें किसे ऋषिनें किसीके प्रति कहाहे। संवेति एक वर्ष पर्य्यंत जिस पुरुष के कर्मका नाश होआहै अर्थात् जिस पुरुषने एक वर्ष नित्य कर्म नहि कीता तिसके दर्शन करणेतें श्रेष्ठ पुरुषानें सर्वदा काल सूर्यका दर्शन करणा योग्यहे॥१॥हे महामते तिसके स्पर्शमें सहित वस्त्रां के स्नान करणा एही

क्षुत्वानिष्ठीव्यवासस्तुपरिधायाचमेद्बुधः कुर्याद्वाब्राह्मणस्पर्शंगोपृष्ठस्यचदर्शनम् ॥ १ ॥ यथाविभवतोह्येतत्पूर्वाभावेततःपरम् अविद्यमानेपूर्वोक्तेउत्तरप्राप्तिरिष्यत इति ॥२॥ संवत्सरक्रियातिपाते विष्णुपुराणे ॥ संवत्सरंक्रियाहानिर्यस्यपुंसःप्रजायते तस्यावलोकनात्सूर्य्योनिरीक्ष्यःसाधुभिःसदा ॥१॥ स्पृष्टेस्नानं सचैलंतुशुद्धिहेतुर्महामते पुंसोभवति तस्योक्तानशुद्धिःपापकर्मणइति ॥२॥अत्रच प्रायश्चित्तविशेषाश्रवणादेकाहातिक्रमेचैकाहमभोजनेनतस्योक्तत्वात्तदनुसारेणच षष्ट्यधिकशतत्रयदिनापचारे तावदुपवासकरणाशक्तेस्तत्प्रत्याम्नायत्वेन षडुपवासैरेकैकप्राजापत्यकल्पनयायोज्यम् ॥ निमंत्रणत्यागेतुयमः

शुद्धिका कारणहै अर जिसके दर्शनादिने एह सूर्य्य निरीक्षणादि प्रायश्चित्तहै तिस पापी पुरुषकी शुद्धि नहि कथन कीती ॥ २ ॥ इसके विषयप्रायश्चित्तके वहुत भेदके देखणेतें क्योंकि एक दिन कर्मके न करणेमें एक उपवास तिसकोंकथन कीताहै तिसके अनुसार करके अर्थात् जिस हसाब करके तीन सौ अर साठ ३६० दिन के वीतिआं होआं तिस उपवास करणेके विषय समर्थांके न होणेतें तब तिस प्रायश्चित्तके बदले करके छिआं ६ उपवासां करके एक एक प्राजापत्य व्रत की कलपना करके जोडने योग्यहे निमंत्रण कों ग्रहण करके तिस के त्यागके विषयें यमजीका वचनहै ॥

केतेति जो ब्राह्मण श्राद्धादिके विमंत्रण कों करवाके अर्थात् भोजनकों मान करके पश्चात् नहिं खांदा सो ब्राह्महत्याके पाप कों प्राप्त होताहै अर मर करके शूद्र योनिकों प्राप्त होताहै ॥ १ ॥ इस पापके प्राप्त होआं होआं ब्राह्मण नियम कों धार करके यति चांद्रायण व्रत कों करके तिस पापतें रहित होताहै ॥ २ ॥ निमंत्रित कीते होए ब्राह्मण के न बुलायणेमें भी एही प्रायश्चित्त जानना ॥ एह वाक्य कामके अभ्यासमेंहै ॥ झूठे वचनादिके विषयमें शंख और लिखितका वाक्य है आक्रोशेति तुमने स्वर्ण चुराआहै इस मिथ्याका नाम आक्रोश है आक्रोशनऔरझूठ कथन करणा इनके विषयमें एक १ रात्र अथवा तीन ३ रात्र उपवास करणा इति अर कामतें अभ्यासकें विषयमें असत्यभाषण

केतनंकारयित्वातुयोनिपातयतिद्विजः ब्रह्महत्यामवाप्नोतिशूद्रयोनौच जायते ॥ १ ॥एतस्मिन्नेनसिप्राप्तेब्राह्मणोनियतव्रतः यतिचांद्रायणंचीर्त्वा ततःपापात्प्रमुच्यते इति २ श्राद्धादौनिमंत्रणंकेतनम् ॥ निमंत्रितस्याऽनाहूवानेप्येतदेव एतच्चकामाभ्यासे ॥ अनृतवचनादौ शंखलिखितौ ॥ आक्रोशनानृतवादे एकरात्रंत्रिरात्रं चोपवास इति ॥ कामतोभ्यासेतु असत्यभाषणं शूद्रसेवनम् इत्यपात्रीकरणंकृत्वा तप्तकृच्छ्रंकृत्वा शुद्ध्यतीति विष्णूक्तंज्ञेयम् ॥ वधफलकेऽनृते तुव्यसनप्रायश्चित्तप्रसंगेनोपपातके घूक्तं द्रष्टव्यम् ॥ व्रणमध्ये कृमिपाते गरुडपुराणे ॥जायंतेयस्यशिरसि कृमयोविनतात्मज कृच्छ्रंतदाचरेत्प्राज्ञःशुद्धयेकश्यपात्मज इति १ यत्तुच्यवनः ॥ कृमिदर्शने सांतपनम् ॥ वृषभोदक्षिणेति ॥

औरशूद्रसेवन इस अपात्री करण संज्ञिकपापकों करके तप्त कृच्छ्र व्रत करके शुद्ध होताहै एह विष्णुजीका कहाहोया वचन जानना हिंसा है फल जिसका ऐसा जो झूठ है तिसके विषय प्रायश्चित्त व्यसन प्रायश्चित्तके प्रसंग करके उपपातकांके मध्यमें कथन कीताहै सो तिस स्थानमें देख लेणा इति जखमके मध्यमे कीटों के पोणेमें गरुड पुराणमें कहाहै ॥ जायमिति । हे गुरुड जिस पुरुषके शिरके विषये कीडे उत्पन्न होतेहैं हे कश्यपके पुत्र सो बुद्धिमान् पुरुष शुद्धिके वास्ते कृच्छ्र व्रतकों आचरण करे ॥ १ ॥ जो च्यवनजीनें कहाहै कि कृमिओंके पोणेमें सांतपन व्रत करे और एक बैल दक्षिणा देवे

एह वाक्य जब एकसमयके विषय अनेकों जखमोंके विषय तीदणकी डे उत्पन्न होंवे तिस विषय विषे जानना इसस्थानमे क्षत्री आदिओंकों एह प्रायश्चित्त एक एक पाद न्यूनजानना अर्थात् क्षत्रीकों तीन ३ पाद सांतपन व्रत अर वैश्यकों आधा अर शूद्रकों एकपाद जानना ॥ दिनमें मैथुनादिके विषयमें शंखजीने कहाहै दिवेति दिनके विषय मैथुननूं करके और तिसी प्रकार जलके विषय नग्न होंकर स्नान करके और नंगी बगानी स्त्रीनूं देखके एक दिन भोजन न करे इति ॥ १ ॥ नग्न शब्दका अर्थ दिखातेहैं नग्न इति एकवस्त्र वाला पुरुष नग्न होताहै इस वचनतें दो २ वस्त्र लय करके अर्थात् धोती और एक उपरणा

तद्युगपदनेकव्रणेषु खरकृम्युत्पत्तौज्ञेयम् ॥ अत्रक्षत्रियादीनांपादपादन्यूनम् ॥ दिवामैथुनादौतुशंखः ॥ दिवाचमैथुनंकृत्वानग्नःस्नात्वातथांभसि नग्नांपरस्त्रियंदृष्ट्वादिनमेकमभोजनमिति ॥ १ ॥ नग्नस्त्वेकवासाः स्यादितिवचनाद्वस्त्रद्वयवान्स्नायादित्यर्थः अत्रनग्नस्नानादावेकरात्रत्रिरात्रयोरभ्यासाद्यपेक्षयाव्यवस्था द्रष्टव्या निषिद्धकाष्ठदंतधावने वृद्धपाराशरःप्राह ॥ पलाशशिंशपाकाष्ठदंतधावनकृन्नरः दिवाकीर्त्तिसमस्तावद्यावद्गांनैवपश्यतीति ॥ १ ॥ एतच्चनिषिद्धकाष्ठांतराणामप्युपलक्षणम् ॥

इनानूं धार करके स्नान करे ॥ इस स्थानमें नग्न स्नानादियोंके विषय एक रात्र और तीन ३ रात्र इनकी व्यवस्था अभ्यासादियोंकी इच्छा करके जाननी अर्थात् कामतें अभ्यासके विषय तीन ३ रात्र उपवास जानना ॥ निषिद्ध काष्ठकी दातनके विषय वृद्धपाराशरजी कहतेहैं पलेति पलाह और टाली इनके काष्ठांकी दातन करणे वाला पुरुष तितना पर्यंत नाईके तुल्य होवाहै जितना पर्यंत गौकों न देखे ॥ १ ॥ पलाशशिंशपा इस पद करके खजूर ढीर केउडा और नारकेल इत्यादि जों निषद्धे काष्ठ हि इनकाभी ग्रहणकरणा

ब्रह्मचारीके धर्मके नाशके विषय बोधायनजीका वाक्यहे शौचेति शौच और आचमन और संध्यावंदन और कुशा और भिक्षा और होम इनका त्याग और शूद्रादिके साथ स्पर्श और कौपीन और कटिसूत्र और यज्ञोपवीत और तड़ागी और दंड और मृगाष इनका त्याग और दिने सौणा और छतड़ीका धारणा और पौये पाणे और पुष्पादि मालाका धारण करणा और बुटना मलना और चंदनादि सुगंधि वाले द्रव्यका मलना और सुरमा पाणा और जलक्रीडा और जुवाखेलणा और नृत्य अर गायन अर बाजा इनके विषय प्रीति करणी और पाषंडी अर चंडाल इत्यादियोंके साथ संभाषण करणा

ब्रह्मचारिधर्मलोपेबोधायनः॥ शौचाचमनसंध्यावंदन दर्भभिक्षाग्निकार्यराहित्यशूद्रादिस्पर्शन कौपीनकटिसूत्रयज्ञोपवीतमेखलादंडाजिनवर्जन दिवास्वाप छत्रधारण पादुकाध्यारोह॥ मालाधारणोद्वर्तनानुलेपनांजनजलक्रीडाद्यूतनृत्यगीतवाद्याद्यभिरति पाषंडिचंडालादिसंभाषण पर्युषितभोजनादि ब्रह्मचारिव्रतलोपसकलनिर्हारार्थं ब्रह्मचारी कृच्छ्रत्रयंचरेत् महाव्याहृतिहोमं चकुर्यात् प्रथमंव्यस्तसमस्तव्याहृतिभिश्चतस्त्रआज्याहुतीर्हुत्वा॥ ओंभूरग्नयेपृथिव्यै महतेचस्वाहा ओंभुवोवायवे चांतरिक्षायमहतेचस्वाहा ओंस्वरादित्यायदिवेचमहतेचस्वाहा ओंभूर्भुवःस्वश्चंद्रमसेचनक्षत्रेभ्यश्चमहतेचस्वाहा ओंपाहिनोअग्नएनसेस्वाहा

और वेहे अन्नका भक्षण करणा इन संपूर्णोंके विषय और ब्रह्मचर्य व्रतके नाशके विषय संपूर्णपापके त्यागणके अर्थ ब्रह्मचारी तीन ३ कृच्छ्र व्रत करे अर महाव्याहृतिओं करके हवन करे अर प्रथम एक एक महाव्याहृति करके तीन ३ आहुतिआं करे पश्चात् सभना महाव्याहृतिआं करके क्या ओंभूः स्वाहा १ ओंभुवःस्वाहा २ ओंस्वःस्वाहा ३ ओंभूर्भुवःस्वःस्वाहा ४ इसरीतिसे तीनके पीछे एक आहुति करे इस प्रकार व्याहृतिआं करके चार घृतकीआं आहुतिआं करके पश्चात् ओंपाहिनो अग्न एनसेस्वाहा इत्यादि करके हवन करे सो मूलमेंहि स्पष्टकीता होआहे ॥

जैसे वउ १ आहुति करके पुनारेति फेर महाव्याहृतिआंकर्के हवनकरे इति एह प्रायश्चित्त थोड़े धर्मके नाशके विषय करणा॥ अर बहुते धर्मकेनाशके विषय अधिक प्रायश्चित्तनूं करण विधान ग्रंथ विषय शौनकजी कहतेहैं तमिति श्मशानके शिवालयके विषय बैठकरके(तंवोधिया)इत्यादि मंत्रकाएक लक्ष १०००००जपकरे ब्रह्मचारिका धर्म शून्यभी होवे तदभी इसजपकरके पूर्ण होताहै इति॥ग्रहण कीता होआ जो व्रत तिसके भंगके विषय वायुपुराणमें लिखाहै लोभेति लोभ और मोह और प्रमाद इनसें कदाचित् व्रतभंग होवे तब तीन ३ उपवास व्रत करे अथवा

ॐपाहिनोऽग्नेविश्ववेदसेस्वाहा ॥ ॐयज्ञंपाहिविभावसोस्वाहा ॥ ॐसर्वं पाहिशतक्रतोस्वाहा ॥ ॐपुनरूर्जानिवर्त्तस्वपुनरग्नइषायुषा पुनर्नःपाह्यंहसः सहरय्यानिवर्त्तस्वाग्नेपिवस्वधारयाविश्वशियाविश्वतस्परिस्वाहा पुनर्व्याहृतिभिर्जुहुयादिति ॥ एतदल्पधर्मलोपे ॥ वाहुल्येतु प्रायश्चित्तविशेषमाह ऋग्विधानेशौनकः ॥ तंवोधियाजपेन्मंत्रंलक्षंप्रेत्याशिवालये ब्रह्मचारिणोहिधर्मशून्यंचेत्पूर्णमेवहीति प्रेतानांयोग्यंस्थानंप्रेत्यंश्मशानमित्यर्थः॥ गृहीतव्रतभंगेवायुपुराणे॥ लोभान्मोहात्प्रमादाद्वाव्रतभंगोयदाभवेत् उपवासत्रयंकुर्यात्कुर्याद्वाकेशमुंडनम् प्रायश्चित्तमिदंकृत्वापुनरेवव्रतीभवेत् अत्र वाशब्दः॥ समुच्चयेमिथ्याशपथे यमः ॥ विप्रस्यवधसंयुक्तंकृत्वातुशपथंमृषा ब्रह्महायावकान्नेनव्रतंचांद्रायणंचरेत् ॥ १ ॥ एतच्चशपथांततरस्याप्युपलक्षकम् ॥

केशांकामुंडनकरावे ॥ इस प्रायश्चित्तनूं करके पश्चात्व्रतकाधारणकरे १ झूठीसुगंदके विषय यमजीका वचनहै विप्रेति ॥ मैंने ब्रह्महत्याकीतीहै जेकरएह कामकीताहे ऐसे ब्राह्मणकी झूठी सुगंद चुकके ब्रह्मघाती होताहै सो यवांके अन्नकरके चांद्रायण व्रतनूं करे ॥ १ ॥ और सुगंदकाभी एही प्रायश्चित्त जानना अर्थात् और तरहांसेभी जेकर कोई शपथकरेगा कि मेरेकोंगौकी शपथ है जैसे वैश्या द्वारपरभीगयाहोयांइत्यादि तौभी यावकान्न करके चान्द्रायण व्रत करे ॥

सुकृतमिति जेहडे पुरुष संपूर्ण आयुषाके विषय कीते होए पुण्य नू किसेके तांई देदेतेहैं सो ध र्म्मराज जीकी आज्ञासे शिलाकर्के पेषणकरीदेहैं जिस प्रकारतेसे पापी पुरुष पेषण करीदेहै १ इहमार्कंडेयपुराणकेवाक्यतें जानना ॥ असे स्थानों विषेप्रायश्चित्तकी व्यवस्था करदेहैं यत्रेति जि स स्थानमें प्रायश्चित्त कथन कीताहै अथवा जिस स्थानमें नहि कथन कीताहै इस उशनसजीके वाक्यतें तिस स्थानके विषय प्राजापत्य व्रत कल्पन करणा ॥ ब्राह्मणकों क्षत्रियादि वृत्ति करके धनके संचयकरणेमें प्रचेतसजीने कहाहै ॥ ब्राह्मणेति पिता ओर माता ओर बहु भृत्य इनके ना शके विषय आपदसमयमें क्षत्रीके धर्मनूं ब्राह्मण जब अंगीकार करेअर तिसके विषय एक वर्ष

सुकृतंयेप्रयच्छंति यावज्जीवकृतंनराः तेपिष्यंतेशिलापेषैर्यथैतेपापकारिण इतिमार्कण्डेयपुराणवाक्यात् यत्रोक्तंयत्रवानोक्तमित्यौशनसवाक्यात्तत्र प्राजापत्यः ॥ कल्पनीयःब्राह्मणस्यक्षत्रियादिवृत्याधनार्जने प्रचेताः । ब्रा ह्मणस्यापत्कालेपितृमातृवहुभृत्यस्यानंतरंक्षत्रोपनिवेशःआपत्कालमेवद र्शयति पित्रिति पित्राद्यभावेक्षत्रोपनिवेशः क्षत्रधर्म्मस्वीकारश्चेत्तदा तत्रे त्यादि तत्रसंवत्सरमर्थप्राप्तौ ॥ चांद्रायणंचरेदिति वैश्यवृत्तिजीवने तत्र वर्षाभ्यंतरे मासादौचांद्रायणभागहारःकल्पनीयः संवत्सरादूर्ध्वेद्विगुण्यत्रै गुण्यादिकल्पनीयम् शूद्रवृत्याधनार्जने मनुः ॥ नकथंचनकुर्वीतब्राह्मणः कर्मवार्षलम् वृषलःकर्मवाब्राह्मंपतनीयेहितेतयोः ॥ १ ॥ वार्षलंकर्म सेवा

व्यतीतहोजावें तब चांद्रायणव्रतकरे । अर जब वैश्यवृत्ति करके उपजीविकाकरे अर तिसस्थान के विषय वर्षके मध्यमेंहि मासादिके व्यतीतहोनेमें चंद्रायणव्रतके तीन ३ भाग अर्थात् तीनपा द कल्पन करणे योग्यहैं अर जेकदाचित् वर्षतें उपरंतहोजाए तब कालके अनुसारदूणा अथ वा त्रीणाइत्यादि चांद्रायणव्रत कल्पना करणे योग्यहैं ॥ शूद्रवृत्ति करके धनके एकत्रकरणेमें मनुजीने कहाहै नेति ब्राह्मण शूद्रके कर्म नूं कदाचित् भी न करे अर्थात् सेवा न करे अर शूद्र ब्राह्मणके कर्मनूं न करे क्योंकि ब्राह्मण ओर शूद्र इनोंको परस्पर कीतेहोये कर्म्म पतित कर देते हैं ॥ १॥

इसप्रकार उपक्रम करके फेर उपनयन कर्मके साथ कृच्छ्रादि व्रतकी पश्चात् प्रवृत्तिके विषय मनुजीकावाक्यहै प्रेति परकर्मके विषये स्थित होकर जैड़े ब्राह्मण और क्षत्री अथवा वैश्य प्रायश्चित्त नूं करतेहैं और अपणी जातितें भ्रष्ट होए होएजी ब्राह्मणहैं तिनांकोभी एही प्रायश्चित्त कथन करे १ ॥ शूद्रकोंभी ब्राह्मण औरक्षत्री अथवा वैश्यके कर्मकरणेके विषय एहि प्रायश्चित्तहै क्योंकि शूद्रकों भी पर कर्म होनेसें अर्थात् निंदित कर्म होनेसें परंतुंपरवृत्तिकर्के एकत्र कीता होआ जो धनहै तिस त्यागके सहित एह प्रायश्चित्त है क्योंकि जिस कारणतें निंदित कर्म केधन नूं संचितकरतेहैं सो तिसधनके त्यागणेतें पिछे प्रायश्चित्त से शुद्ध होतेहैं इस मनुके वचनतें जानना ॥ स्त्रीके धन कर्के उपजीविका करणेमे कहते हैं चांद्रेति एक चांद्रायण व्रत कर्के संपूर्ण पापांका नाश होताहैं सोधन स्त्रीके तांई दे करके चांद्रा

एवमुपक्रम्य पुनरुपनयनसहितकृच्छ्राद्यनुवृत्तौ सएव ॥ प्रायश्चित्तंप्रकुर्वंतिविकर्मस्थास्तुयेद्विजाःब्राह्मण्याच्चपरित्यक्तास्तेपामप्येतमादिशेत् १ ॥ शूद्रस्यापिद्विजकर्मकरणेऽप्येतदेव ॥तस्यापि तद्विकर्मत्वात् अर्जितधनत्यागपूर्वकंचैतत् ॥ यद्गर्हितेनार्जयंतीति मनूक्तेः ॥ स्त्रीधनोपजीवनेतु सएव चांद्रायणेनचैकेन सर्वपापक्षयोभवेत् ॥ चान्द्रायणंस्त्रियैतद्धनंदत्वाकार्य्यम् ॥ भार्यायामुखमैथुनेतूशनाः ॥ यस्तुब्राह्मणोधर्मपत्नीमुखेमैथुनंसेवेतसदुष्यतीति वैवस्वतः ॥ प्राजापत्येनशुद्ध्यतीति ॥ गोयुक्तयानस्थस्यमैथुनेयमः ॥ यदिगोभिःसमायुक्तंयानमारुह्यवैद्विजः मैथुनंसेवतेचैवमनुःस्वायंभुवोऽब्रवीत् ॥ १ ॥ त्रिरात्रंक्षपणंकृत्वासचैलस्नानमाचरेत् गोभ्योथवसकंदद्याद्घृतंप्राश्यविशुद्ध्यतीति ॥ २ ॥ यत्तु स्मरणम्

यण व्रत करणा स्त्री धन इस जगाउहै जो विवाह विषे पित्रादियोंने दित्ताथा और श्वशुरके घर पाद वंदनके समय दिताहै ॥ स्त्रीके मुखके विषय मैथुन करणेमें उशनसका वचन है यइति जो ब्राह्मण अपणी धर्म पत्नीके अर्थात् विवाहिता स्त्रीके मुखमे मैथुन करताहै सो पतित होताहै अर्थात् पापी होताहै इसका प्रायश्चित्त वैवस्वत मनुजीनें कहाहै कि प्राजापत्य व्रत कर्के सो शुद्ध होताहै इति ॥ बैल कर्के युक्त जो गाडी तिसके विषय स्थित पुरुषके मैथुनमें यमजीका वचनहै यदीति जद ब्राह्मण और क्षत्री अथवा वैश्य बैल कर्के युक्त जो गाडी किसके विषय स्थित होकर्के मैथुन करताहै इसमे स्वायं भुव मनुजी कहते भये ॥ १ ॥ तीन ३ रात्र उपवास कों कर्के सहित वस्त्रांदे स्नान करे अर बैलांके तांई घासदेदेवे अर्थात् बैलांनूं घारे पश्चात् घृतका भक्षणकरे तो शुद्धहोताहै ॥ २ ॥ जो कथनहै

मैथुनमिति ब्राह्मण और क्षत्री अथवा वैश्य बैलां कर्के संयुक्त जो गाडी तिसके विषयस्थित होकर्के स्त्रीके अथवा पुरुषके साथ दिनमे मैथुनकों करताहै सो सहित वस्त्रांके स्नानकरे । १ । एह अकामतें एक वारकरणेके विषय जानना ॥ अर काम कर्के पुरुषके साथ मैथुन करणेका प्रायश्चित्त जाति वंशादिके विषय कहाहै । तूं मेरीमाताके समानहैं ऐसे जो पुरुष क्रोधतें अपणी स्त्रीकों कह कर्के फेर मैथुनके वास्ते इच्छा करताहै तिसके विषय पराशरजीने कहाहै यइति जो पुरुष क्रुद्धहो कर्के अपणी स्त्रीकों मैथुनके अयोग्यनूं कहताहै अर्थात् तूं मेरी माताहैं ऐसें वचन कहताहै अर फेर मैथुनके वास्ते इच्छा करताहै सो पुरुष ब्राह्मणांके मध्यमें अपणे प्रायश्चित्त कों कथन करवाए । १ । इसीमें औरवचन है आर्त्तइति आर्त्त क्या दुःखी अथवा क्रोध अथवा अज्ञान अथवा क्षुधा अथवा तृषा अथवा भय इनां कर्के पीडित होआ होआ

मैथुनंतुसमासाद्य पुंसियोषितिवाद्विजः गोयानेपुदिवाचैवंसवासाःस्नानमाचरेत्१ तदकामतः सकृत्करणेज्ञेयम् क्रोधाद्भार्यात्वंमेमातासदृशीत्युक्त्वा पुनःसंभोगेपराशरः। यस्तुक्रुद्धःपुमान्ब्रूयाज्जायायास्तुअगम्यताम् पुनरिच्छतिभर्यांचविप्रमध्येतुवाचयेत् १ आर्त्तःक्रुद्धस्तमोघोवाक्षुत्पिपासाभयर्दितःदानंपुण्यमकृत्वावा प्रायश्चित्तंदिनत्रयम् २ उपस्पृशेत्रिषवणंमहानद्युपसंगमे स्नानांतेचैवगांदद्याद्ब्राह्मणान्भोजयेद्दशेति ३ वाचयेत्स्वस्यप्रायश्चित्तस्योपदेशंकारयेत् पुण्यंयागादिसंकल्पितंदानयागाद्यकृत्वेत्यर्थः वस्तिकर्मणियमः।वस्तिकर्मणिरूढेश्चप्रच्छर्दनविरेचनेः शिशुकृच्छ्रेणशुद्ध्येतस्मात्पापान्नसंशयः १ प्रच्छर्दनविरेचनयोरभ्यासएवशिशुकृच्छ्ःअन्यत्रतुस्नानमात्रम्

दान और यज्ञादि नूं न कर्के तिसस्त्रीनूं गमन करे तां प्रायश्चित्त तीन ३ दिन करे । २ । और जेकर दानादि होण तो व्रतका प्रयोजन नहि तिसके विना कहतेहैं उपेति अर तीन काल महानदीके संगमके विषय स्नान करे और स्नानके अंतमें गौसंकल्प करे और दश १० ब्राह्मणां नूं भोजन खुलावे ॥ ३ ॥ वस्तिकर्मके विषय यमजीका वचनहै वस्तीति मूत्राशयकी चिकित्साकानाम वस्तिकर्महै मूत्राशयके शोधन करणके वास्ते उलटी अथवा जिलाब करवाए तिस पापतें पुरुष शिशु कृच्छ्र व्रतकर्के शुद्ध होताहै इसमें संदेह नहि । १ उलटी और जलाबके अभ्यासके विषय शिशुकृच्छ्र व्रत नू करे जेकरकदाचित् करवाए तद स्नान कर्के हि शुद्ध होजाताहै अर वस्तिकर्मका स्वरूपदेखणा होवे तब भाव प्रकाशमें देखलेणा

तिसे प्रकार अजीर्णादिकेविषयभी यमजीका कथनहै। अजीति अन्नकान पचना और पूर्वकहा जो अभ्युदित और उद्वमन और क्षौर कर्म और मैथुन और खोटा स्वप्न और दुष्ट पुरुषके साथ स्पर्श इनके विषयमें स्नान मात्र अर्थात् केवल स्नानाहि कहाहै। २। देवताके मंदिरके शिलादि करके अपने गृहके बनानेमेंयमजो निंदाकरतेहैं इष्टेति देवताके मंदिरमे लगिआंहोआं जो पकि आं इटां और काष्ट और लोहा और पाषाण इनानूं ल्या करके लोभतें अपणे गृहके विषय जो पुरुष जोड़ते हैं अर्थात् इनां करके अपणे गृहनूं बनातेहैं। १। सो एकले और भयभीत और क्षुधातृषा करके दुःखी होए होए जितना पर्यंत पापका नाश नहि होता तितना पर्यंत बंधनमे

तथाच सएव ॥ अजीर्णेऽभ्युदितेवान्तेश्मश्रुकर्मणिमैथुने दुःस्वप्नेदुर्जनस्प र्शेस्नानमात्रंविधीयते॥२॥ देवागारशिलादिना स्वगृहकरणंनिंदति यमः इष्टकाकाष्ठलोहाश्मदेवालयसमन्वितम् गृहीत्वात्मगृहेचैवलोभाद्येयोजयं तिये १ ॥ एकाकिनस्तथोद्विग्नाः क्षुत्तृषापरिपीडिताःबंधनेतेतुतिष्ठंतियाव त्पापस्यसंक्षयः २॥ अत्र प्राजापत्यचान्द्रायणादिकल्प्यम्॥ वानप्रस्थय त्योर्व्रतभंगे सएव वानप्रस्थोदीक्षाभेदेकृच्छ्रंद्वादशरात्रंचरित्वामहाकक्षंव र्द्धयेत् ॥ भिक्षुर्वानप्रस्थवत्सोमवृद्धिवर्जस्वशास्त्रसंस्कारंचेति दीक्षाभे दोयमनियमातिक्रमः महाकक्षमौषधवनप्रदेशमुदकसेचनादिना वर्द्धयेत सोमशब्देनौषधिसामान्यंलक्ष्यते॥ तद्वृद्धिःपरंभिक्षोर्निवर्त्तते परंतु स ममित्यर्थः स्वशास्त्रसंस्कारः प्राणायामाभ्यासः ॥

अर्थात् नरकमें स्थित होतेहैं ॥ २ ॥ इसके विषय प्रायश्चित्त प्राजापत्य और चांद्रायणादिव्रत कल्पन करणा ॥ वानप्रस्थ और यति के व्रत भंगमेंभी यमजीका वचनहै ॥ वानेति वानप्रस्थी जब यम और नियम कर्मोंका उल्लंघन करे तब द्वादश १२ रात्रके कृच्छ्र व्रत नूं करके पश्चात् औषधिके बन नूं जलके सेचन करणे करके बधावे ॥ और संन्यासी भी जब यम और नियमादि कर्मोंका उल्लंघन करे तब औषधिकी वृद्धितें बिना अपणे शास्त्रके संस्कारनूं करे अ र्थात् प्राणायामके अभ्यास नूं करे अर औषधिओंकी वृद्धिका संन्यासीको निषेधकिताहै (दीक्षा भेदोयमनियमातिक्रमः) इत्यादि पदां करके पूर्वले वाक्यका हि अर्थ स्पष्ट कीताहै ॥

हारीतजीका वाक्यहै झूठ और चुगली इनके वचनमे अर्थात् झूठ और चुगली कथन करके संन्यासी तप्त कृच्छ्र व्रत नू करे ॥ क्रोध और अहंकार और चुगली इनके विषय छागलेय जीका कथनहै व्रतेति संन्यासियोंके जो व्रत अर तिसी प्रकार जो उपव्रत हैं इनां मेसें एक एकके भी उल्लंघनके विषय प्रायश्चित्त विधानकरीदाहै कि एक १ दिन रात्र उपवासनूं रक्षकर्के पश्चात् कृच्छ्र व्रतके सहित चांद्रायण व्रत नूं करे ॥ १ ॥ व्रत और उपव्रतां नूं वौधायनजी कहतेहैं आदिके विषय मौनिके व्रतांनूं कहतेहैं ॥ अहिंसेति जीवोंको न मारणा और सत्य कहणा और चोरी न करणी और मैथुन नकरणा एह संन्यासीके व्रत कहे हैं ॥ इसतें उपरंत उपव्रतांनूं कहतेहैं अक्रोध इति क्रोध न करणा और गुरुकी शुश्रूषा करणी और सर्वदा काल प्रसन्न

हारीतः अनृतपिशुनवचने भिक्षूणांतप्तकृच्छ्रः ॥ क्रोधाहंकारपिशुनेषुच छागलेयः ॥ व्रतानियानिभिक्षूणांतथैवोपव्रतानिच एकैकातिक्रमेतेषांप्रायश्चित्तंविधीयते अहोरात्रोपितोभूत्वाकृच्छ्रचांद्रायणंचरेत् १ । कृच्छ्रपदंचांद्रायणविशेषणम् व्रतोपव्रतान्याह वौधायनः अथ मौनिव्रतानि। अहिंसा सत्यवचनमस्तेयंमैथुनस्यचवर्जनम् ॥ अथोपव्रतानि ॥ अक्रोधोगुरुशुश्रूषाप्रसादश्शौचमाहारशुद्धिश्चेति जलप्रातिविंवदर्शनादौयाज्ञवल्क्यः ॥ मयितेजइतिच्छायांस्वांदृष्ट्वांवुनिवैजपेत् सावित्रीमशुचौदृष्टेचापलेचानृतेपिच ॥ १ मयितेज इतिमंत्रोवाजसनेयिप्रसिद्धः

रहणा और शौच करणी और शुद्ध भोजन करणा एह उपव्रत कथन करते हैं ॥ जलके विषय छायाके दर्शनादिमें अर्थात् जलमें अपना स्वरूपदेखनेमे याज्ञवल्क्यजीने कहाहै मयीति जलके विषय अपणी छायानूं देखकरके (मयितेजः) इत्यादि वाजसनेयिके मंत्र नूं जपे और अशुद्धवस्तुके दर्शनमें अर चित्तकीअनवस्थिति औरझूठवचन इनके विषयमें सावित्रीनूं जपे अर्थात् गायत्रीका जप करे ॥ १ ॥ इसजगा मयितेज इसमंत्रका और गायत्रीका जप एकवारहि करणा चाहिए और जेकर बहुतवार प्रतिविंवादि दर्शनहोवे तों बहुवार करणा

अशुचिस्थान और मूत्र और पुरीषादि और अनवस्थिति और निरर्थक शरीरकी क्रिया और अंगीकार करके पश्चात् झूठ कथन करणा इनके विषय हारीतजीका वाक्यहै ॥ प्रतीति जोपुरुष प्रथम अंगीकार करके पश्चात् झूठ अथवा मिथ्याकों सत्य कथन करे सो तप्तकृच्छ्रके सहित चांद्रायण व्रतकों करे ॥ १ ॥ एहवाक्य गुरुकों प्रथम कथन कीता जो है क्याकि मैं तुसाडा एह काम करांगा अथवामैं तुसानूं एह वस्तु दिआंगा इतना वचन कहकर पश्चात् न करणा तिसके विषय जानना क्योंकि प्रायश्चित्तकों बडाहोणेते । भोजन कालके विषय जो मौनव्रतहै तिसके नाशके विषय पराशरजीका वचनहै मौनेति मौन व्रतकों अंगीकार करके ब्राह्मण और क्षत्री अथवा शूद्र स्थित होआ होआ न कथन करे अर्थात् भोजनतें पहले बोल णाया तिस विषय न बोले अर भोजन भक्षण करदा होआ जो बोलें सो पुरुष शेष अन्ननूं त्यागदेवे क्या बोलणेतें पीछे भोजन न करे ॥ १ ॥ केवल मुखकर्के

अशुचौ मूत्रपुरीषादौचापले वृथाचेष्टायांप्रतिश्रुत्यानृतोक्तौहारीतः॥ प्रतिश्रुत्यानृतंब्रूयान्मिथ्यासत्यमथापिवा सतप्तकृच्छ्रसहितंचरेच्चान्द्रायणव्रतमिति।१।गुरुवस्तुविषयकप्रतिश्रुताकरणपरमेतत् प्रायश्चित्तस्य गुरुत्वात् भोजनकालीनमौनव्रतलोपे पराशरः मौनव्रतंसमाश्रित्यआसीनोनवदेद् द्विजः भुंजानोहिवदेद्यस्तुतदन्नंपरिवर्जयेत् ॥१॥ केवलमुखेन जलपानेस एव। विद्यमानेषुहस्तेषुब्राह्मणोज्ञानदुर्बलः तोयंपिबतिवक्त्रेणश्वयोनौजायतेध्रुवम्।२।असपिंडैःसहरोदने पारस्करः। मृतस्यबांधवैःसार्द्धंकृत्वातुपारिदेवनम् वर्जयेत्तदहोरात्रंदानंश्राद्धादिकर्मचेत्यनेनैकाहः॥१॥एतच्च कामतः अकामतस्तुस्नानमेव ॥ प्रेतालंकरणेशंखः॥कृच्छ्रपादःसपिंडस्यप्रेतालंकरणेकृतेअज्ञानादुपवासःस्यादशक्तौस्नानमिष्यतइति॥ १ ॥ कामतोद्विगुणम्

जल पीणेके विषयभी पराशरनेहि कहाहै विद्येति हत्थांके हुंदिआं जो ज्ञानदुर्बल अर्थात् मूर्ख ब्राह्मण जलकों केवल मुख करके पीवताहै अर्थात् लम्मा पैकर मुखके साथ पान करता है सो निश्चय करके कुत्तेकी योनिकों प्राप्त होताहै ॥ २ ॥ असपिंडांके साथ रुदन करणाके विषय पारस्करजीका कथनहै मृतेति मृत होआ जो कोई असंबंधी पुरुषहै तिसके संबंधिआंके साथ रुदननूं करके तिस दिन रात्रके विषय दान और श्राद्ध अर आदिपद करके तर्पणादि इनानूं न करे क्योंकि तिसते वोह अशुद्धहै १ सो एह इच्छा करके जब करे तब एक दिन वर्जन करे अर जब इच्छासें न करे तब स्नान करकेहि शुद्ध होताहै ॥ १ ॥ प्रेतके भूषण करणे विषय शंखजीका वचनहै कृच्छ्रेति भिन्न पिंड वाला जो प्रेतहै तिसके भूषण करणेमें अर्थात् स्नानादि कराणेमें कृच्छ्र व्रतका एक पाद करे अर जब अज्ञानतें करवाए तब एक दिन उपवास करे अर जब इसमे शक्ति न होवे तब स्नानमात्रहि इच्छितहै ॥ १ ॥ अर कामके विषयमें दूणा प्रायश्चित्त करे ॥

जो तप्त कृच्छ्रकी प्रवृत्तिके विषय अंगिराजी का वाक्यहै कि आत्मत्याग करणवाले प्रेतोंके संस्कार करणके विषय अर्थात् शवांके स्नानादि करवाणेमें पातकी होताहै अर्थात् तप्त कृच्छ्र व्रत करके शुद्ध होताहै सो एह वाक्य अभ्यासके विषयमें जानना ॥ सजाति और भिन्न जाति के शवके पीछे गमनके विषयमें मनुजीका वचनहै अन्विति सजाति और भिन्नजाति वाला जो शवहै तिसके पीछे इच्छासें जो पुरुष जाताहै अर्थात् मुरदेके दाह करण वास्तें जो साथ जाताहै सो सहित वस्त्रांके स्नान करके और अग्निनूं स्पर्श करके अर घृतका भक्षण करे तो शुद्ध होताहै ॥ १ ॥ इस स्थानमें इच्छया इस पदके ग्रहण करणेसें एह कामके विषयमें जानना ॥ अर अकामके विषयमें केवल स्नानहि कथन कीताहै ॥ फेर याज्ञवल्क्यने जो कहाहै कि ब्राह्मेति भिन्न पिंड वाले ब्राह्मणने ब्राह्मण और क्षत्री

यत्तु तप्तकृच्छ्रानुवृत्तौ अंगिराः ॥ आत्मत्यागिनांच संस्कर्तौ तदस्तुपातककारीचेति तदभ्यासे ॥समानेतरजातिप्रेतानुगमने मनुः। अनुगम्येच्छयाप्रेतंज्ञातिमज्ञातिमेवच स्नात्वासचैलःस्पृष्ट्वाग्निंघृतंप्राश्यविशुध्यतीति १ अत्रेच्छयेतिग्रहणादेतत्कामतः अकामतस्तुस्नानमेव यत्तुयाज्ञवल्क्यः ब्राह्मणेनानुगंतव्योनशूद्रोनाद्विजःक्वचित् अनुगम्यांभसिस्नात्वास्पृष्ट्वाग्निं घृतभुक्शुचिः॥१॥ ब्राह्मणेनासपिंडेन द्विजोविप्रादिः ॥ अस्यचघृतप्राशनस्यभोजनकार्यविधाने प्रमाणाभावान्नभोजननिवृत्तिरितिमिताक्षरायाम् तन्मानवसमानविषयम् ॥ वस्तुतोघृतस्यप्रायश्चित्तार्थत्वादभोजनमेवयुक्तम् अतएववासिष्ठेन मनुष्यास्थिस्निग्धंस्पृष्ट्वात्रिरात्रमस्निग्धेत्वहोरात्रं शवानुगमनेचैवमिति ॥

और वैश्य अथवा शूद्र इनके मृत होयां पीछे गमन नहि करणे योग्य जे कदाचित् जाएभी तब जलके विषय स्नान करके अर अग्निनूं स्पर्श करके और घृतका भक्षण करके शुद्ध होवाहै ॥ १ ॥ इस घृतभक्षणकों भोजन कार्यकी विधिके विषयमें अप्रमाण होणेतें और भोजन की निवृत्ति नहि जाननी एह मिताक्षरामें लिखाहै सो मनुजीके वचनकें तुल्यहि जानना वास्तवतें घृत भक्षणकों प्रायश्चित्तके अर्थ होणेतें भोजन नहि भक्षण करणे योग्य ॥ इसी कारणसें वसिष्ठजीने कहाहै मनुष्येति पुरुषकी नवीन हड्डीका स्पर्श करके तीन ३ रात्र उपवास करे अर पुराणी हड्डीका स्पर्श करके एक १ दिन रात्र उपवास करे इसी प्रकार शवके पीछे गमनके विषय जानना चाहिए ॥

विप्रेति ब्राह्मण प्रेतके पीछे गमनके विषय एक दिन कथन करणेतें क्षत्री प्रेत और वैश्य प्रेत के पीछे गमनके विषय कुछक अधिक प्रायश्चित्त कल्पन करणा चाहिए ॥ ब्राह्मणकों शूद्रके पीछे गमनके विषय पराशरजीका वाक्यहै । प्रेतीति लेजाईदे होए शूद्र शवके पीछे जो मूर्ख ब्राह्मण जाताहै सो तीन १ रात्र व्रत करके शुद्ध होताहै ॥ १ ॥ तीन रात्र व्रतके कीतिआं होआं पश्चात् समुद्रमे प्रवेश करण वाली जो नदी है तिसकों प्राप्त हो करके अर्थात् वडी नदीके विषय स्नान करके अर पश्चात् सौ १०० प्राणायाम कों करके और घृतका भक्षण करके शुद्ध होताहै ॥ २ ॥ इस स्थानमें घृत भक्षणकों शुद्धिके अर्थ कथन करणेतें भोजनका निषेध नहि एह वाक्य कामका विषयहै ॥ अकामके विषयमें इसतें आधा प्रायश्चित्त करणा ॥ इसी प्रकार क्षत्रीकों वैश्य और शूद्रप्रेतके पीछे गमनमें अर वैश्यकों शूद्र प्रेतके पीछे गमन करणेमें प्रायश्चित्त कल्पन करणा ॥ अग्निहोत्रादि कर्म और वा

विप्रानुगमने एकाहस्योक्तत्वात् क्षत्रियवैश्यानुगमने त्वधिकं कल्प्यम् ब्राह्मणस्य शूद्रानुगमने पराशरः ॥ प्रेतीभूतंतुयःशूद्रंब्राह्मणोज्ञानदुर्बलःअनुगच्छेन्नीयमानंसत्रिरात्रेणशुद्ध्यति १ त्रिरात्रेतुततश्चीर्णेनदींगत्वासमुद्रगाम् प्राणायामशतंकृत्वाघृतंप्राश्यविशुद्ध्यतीति २ अत्र घृतप्राशनस्य शुद्ध्यर्थाभिधानान्नभोजननिवृत्तिः॥ एतच्चकामतःअकामतस्त्वर्द्धम् ॥ एवं क्षत्रियस्यवैश्यशूद्रानुगमने वैश्यस्य शूद्रानुगमनेकल्प्यम् ॥ इष्टापूर्तेशुभाशुभमहाकर्म्मस्वनुपहतानामपिऋत्विगाचार्यादीनांत्रीणि कृच्छ्राणि चांद्रायणास्यसर्वप्रायश्चित्तमाह प्रयोगपारिजाते आचार्यः॥ सएवरजस्वलाकन्यारक्षणे प्रायश्चित्तमाह॥कन्यामृतुमतींशुद्धांकृत्वानिष्कृतिमात्मवान्तथातुकारयित्वातामुद्वहेतान्नृशंसधीः १ दद्यात्तदृतुसंख्यागाःशक्तःकन्यापिता यदि दातव्यैकापिनिःस्वेनदानेतस्यायथाविधि ॥ २ ॥ तस्यागोर्दानेयथाविधि ऋतुसंख्याकाविधि यथास्यात्तथाऽचरणीयमित्यर्थः

पी कूपादि और शुभ और अशुभ एह जो महाकर्म हैं इनके विषयमे चतुर भी हैं ऋत्विक् और आचार्यादि इनकों भी त्रय कृच्छ्र और चांद्रायण संपूर्ण प्रायश्चित्तकों प्रयोग पारिजातमें आचार्यजी कथन करते भये ॥ सोई आचार्यजी रजस्वला कन्याके रक्षणमें प्रायश्चित्त कों कहते हैं । कन्यामिति ज्ञानवाला और नहि निंदाके योग्य बुद्धि जिसकी ऐसा पुरुष प्रथम प्रायश्चित्तकों करके अर कन्याकों भी प्रायश्चित्त करवाके पश्चात् ऋतुवाली कन्याकों विवाह लये ॥ १ ॥ दद्येति अर कन्याका पिता जद समर्थ होवे तब कन्याकी ऋतुके समान गौआं देवे अर्थात् जितनीयां ऋतु लंघीयां होण विवाहतक तितनीयां गौयांका दान करे एह अर्थ है अर कन्याके विधि पूर्वक दानके विषय निर्धननें भी एक गौ देणी योग्यहै परंतु तिस गौके दान विषय ऋतु संख्याके नाम करके संकल्प करणा ॥ २ ॥

सो गौआं जामाता को देवियां अथवा ब्राह्मणको इसका उत्तर कहतेहैं ॥ गा इति और कन्याका पिता धनी होवे तब ब्राह्मणांकों गौआं देवे और जब निर्धन होवे तब दक्षिणा मात्रदेवे तिस कारणतें ऋतुकी संख्याके समान ब्राह्मणांकों गौआं देवे अथवा कन्या पासों दुवाए ॥ ३ ॥ उपोष्येति और कन्या तीन ३ दिन उपवास रखकर पश्चात् रात्रिके विषय गौआंके दुग्धकों पीवे जब ऋतुतें रहित कन्या होवे तिस कालके विषय कन्याके तां ई भूषण देवे और तिस कन्याकों विवाहन वाला वर भी कूष्मांड संज्ञिक मंत्रों करके घृतका हवन करे ॥ ४ ॥ श्राद्ध और उपवासके दिनमें दातन करणके विषय विष्णु रहस्यमें लिखाहै । श्राद्धेति श्राद्ध और उपवासके दिनमें दातनकों करके गायत्रीके सौ १०० मंत्र करके पवित्र होआ जो जलहै तिसका आचमन करके शुद्ध होताहै ॥ १ ॥ और

गादद्याद्ब्राह्मणेष्वेवानिःस्वोनिःस्वस्तुदक्षिणाम् तस्मादृतुसंख्येषुब्राह्मणेषुप्रदापयेत् ॥ ३ ॥ उपोष्यत्रिदिनंकन्यारात्रौपीत्वागवांपयः अदृष्टरजसेदद्यात्कन्यायैतत्रभूषणम् तामुद्वहन्वरश्चापिकूष्मांडैर्जुहुयाद्घृतमिति ४ श्राद्धोपवासदिने दंतधावने विष्णुरहस्ये ॥ श्राद्धोपवासदिवसेखादित्वादंतधावनम् गायत्र्याःशतसंपूतमंबुप्राश्यविशुध्यतीति ॥ १ ॥ अन्यान्यपिप्रकीर्णकान्यपरार्के शंखः ॥ प्रेतस्यप्रेतकार्याणिअकृत्वाधनहारकः वर्णानांयद्वधेप्रोक्तंतदर्धंप्रयतश्चरेत्॥१॥ अतिमानादतिक्रोधाद्भयादज्ञानतोपि वा उद्बध्नीयात्स्त्रीपुमान्वापिगतिरेषांनविद्यते ॥ २ ॥ पूयशोणितसंपूर्णेतमस्यंधेसुदारुणे षष्टिवर्षसहस्राणिनरकेयदुपासते ॥ ३ ॥ गोभिर्हंतं तथोद्बद्धंब्राह्मणेनचघातितम् संस्पृशंतेतुयेविप्रागरदाश्चाग्निदाश्चये ॥ ४

और प्रकीर्णक प्रायश्चित अपरार्कमें शंखजीने कथन करते हैं ॥ प्रेतेति ॥ प्रेतके धन कों ग्रहण करणे वाला जब प्रेतके कर्माकों न करे तब वर्णाके हत करणेके विषय जो प्रायश्चित्त कहाहै तिसतें आधा प्रायश्चित्त इंद्रियोंकोंरोककरकरे १ अब और कहतेहैं अतीति बहुत मान और बहुत क्रोध और भय अथवा अज्ञान इनतें स्त्री अथवा पुरुष किसीकों फांसी दे देवे तिनकी गति नहि होती । २ । तिनकी व्यवस्था कहतेहैं पूयेति पाक और रुधिर करके पूर्ण होआ होआ और अंधकार करके युक्त और भयानक जो नरक है तिसके विषय सठ हजार ६०००० वर्ष रहतेहैं ॥ ३ ॥ और कथन करतेहै ॥ गोभिरिति गौआंने जो मारिआ है और तिस प्रकार फांसी ले करके जो मृत होआ है और ब्राह्मणने जो मारिआ है इनाकों जेडे ब्राह्मण स्पर्श करते हैं और जेडे विषके देणे वाले हैं और जेडे अग्निके देणे वालेहैं ॥ ४ ॥

अन्विति और जेडे फांसी कर्के मृतहोयेके पीछे जातेहैं और जेडे पाशके छेदने वाले हैं सो संपूर्ण पापकर्के संयुक्तहोतेहैं तिनांकी शुद्धिनूं मैं कहताहुं । ५ । तप्तेति सो सब तप्तकृच्छ्र व्रतकर्के शुद्धहोतेहैं और ब्राह्मणांकोंभोजन खुलावें अर ब्राह्मणकेताईं बैलकेसहित गौ दक्षिणादेवें ६ ॥ इहां एकवचन बहुवचनके स्थानजानना इसी विषयमें संवर्त्तजीका वाक्यहै गविति गौआंने जो ब्राह्मणने हतकीताहैं और आप पाशादिकर्के मृतहोआहै कल्याणकी इच्छा करदे जो सत्पुरुषहैं तिनांनें इनके विषय रोदन न करणा चाहिए । १ । और कथन करतेहैं एषामिति इनांके मध्यमें एक किसी प्रेतनूं जो पुरुष आच्छादनकरताहै अथवा चुकताहै अथवाकटोदक क्रियानूं करताहै

अनुयातारोऽपियेचान्येयेचान्येपाशछेदकाः सर्वेतेपापसंयुक्तास्तेषांवक्ष्यामिनिष्कृतिम्॥ ५ ॥ तप्तकृच्छ्रेणशुद्ध्यंतिकुर्याद्ब्राह्मणभोजनम् अनडुत्सहितां गांचदद्याद्विप्रायदक्षिणाम् ॥ ६ संवर्त्तः॥ गोभिर्हतेतथाविप्रेतथाचैवात्मघातिनि नैवाश्रुपातनंकार्यंसद्भिःश्रेयोऽभिकांक्षिभिः ॥ १ ॥ एषामन्यतमंप्रेतं योवसेतवहेतवा कटोदकक्रियांकृत्वातप्तकृच्छ्रंसमाचरेत् ॥ २ ॥ तच्छवंकेवलंस्पृष्टमश्रुवापातितंयदि पूर्वोक्तानामकर्त्ताचेदेकरात्रमभोजनम् ॥ ३ ॥ पूर्वोक्तानांकटोदकक्रियादीनामकर्त्ता केवलं तच्छवस्पर्शाश्रुपातकर्त्ताचेत्तदेदमल्पप्रायश्चित्तमिति ॥ तथा ॥ यआत्मत्यागिनःकुर्यात्स्नेहात्प्रेतक्रियां नरःसतप्तकृच्छ्रसहितंचरेच्चांद्रायणव्रतम् ॥ १ ॥ बुद्धिपूर्वकएतत् ॥

अर्थात् उठाणे वास्ते किडा बनाकर लेजाताहै और जल देताहै सो पुरुष तप्त कृच्छ्र नूं करे । २ । और कहतेहैं तदिति अर जिसने केवल शवकेसाथस्पर्श कीताहै अथवा रोदन कीताहै अर कटोदकादि क्रिया जिसने नहिंकीती तिसको एक रात्र उपवास कहाहै॥३॥पूर्वोक्तानांइत्यादि पदों कर्के इसी श्लोकका हि अर्थ स्पष्ट कीताहै ॥ तिस प्रकार औरभी कहतेहैं यइति जो पुरुष आत्मत्यागीहै अर्थात् पाशादि कर्के जो आप मृत होआहै तिसकी प्रेतक्रिया नूं जो पुरुष स्नेहतें करताहै सो तप्त कृच्छ्रके सहित चांद्रायण व्रतनूं करे॥१॥एह ज्ञानके विषयमें जानना

इसी विषयमें यमजीका वाक्यहै नेति ब्राह्मणांके दंड कर्के हतहोए जो पुरुषहैं तिनके अ शौच और उदक और रोदन और निंदा और दया और तखतेका चुकणा इनां नूं नकरे।१। ब्रह्म दंड नाम शापकाहै परंतु किसे नहीं ब्राह्मणांतें मृतहोवे सो सभ ब्रह्मदंडहत जानणा और कहतेहैं ॥ स्नेहाति स्नेह और अपना कोई कार्य तिसको सिद्धि वास्ते और भय इत्यादितें जो पुरुष आत्मत्यागीके अशौचादि नूं करताहै सो गौआंके मूत्रकर्के यवांके आहार नूं करदा होया तप्तकृच्छ्र व्रत कर्के शुद्ध होताहै।२।एतानि इत्यादि पदोंमें इसी श्लोकका हि अर्थस्पष्टकीताहै और कथन करतेहैं कृत्वेति आत्मात्यागीको अग्नि और उदक और स्नान करवाणा और स्पर्श

यमः ॥ नाशौचंनोदकंचाश्रुनापवादानुकंपने ब्रह्मदंडहतानांतुनकार्य्यंकट धारणम्॥१॥स्नेहकार्य्यभयादिभ्योयस्त्वेतानिसमाचरेत् गोमूत्रयावकाहारैः सतुकृच्छ्रेणशुध्यति॥२॥एतानिआत्मत्याग्याद्यशौचादीनि कटःशवखट्वा कृत्वाग्निमुदकंस्नानंस्पर्शंवहनमेवच रज्जुच्छेदाश्रुपातेच तप्तकृच्छ्रेणशुद्ध्य ति॥३॥एतत्समुदितानां कर्म्मणां मतिपूर्वके संवर्त्तः वोढॄणामग्निदातॄणांसं विधानविधायिनाम् तप्तकृच्छ्रद्वयाच्छुद्धिरेकमेवानुयायिनाम् १संविधानवि धायिनःप्रेतालंकारकारिणः एतदपिसमुदितकरणे

और चुकणा और पाशका छेदन और रोदन इना नूं जो पुरुष करदाहै सो तप्त कृच्छ्र व्रत कर्के शुद्ध होताहै ॥३॥ कथन कीते जो आत्मत्यागीके कर्महैं सभना इनको ज्ञान कर्के जब करे तब एह प्रायश्चित्त जानना॥संवर्त्तजीका भी इसी विषयमें वाक्यहै वोढॄणामिति चुकणे वाले और अग्निके देणे वाले और प्रेतको भूषण करणे वाले इन संपूर्णोंकी दो २ तप्त कृच्छ्रतें शुद्धि होतीहै और पीछे जान वाल्यांकी एक तप्त कृच्छ्र कर्के शुद्धि होतीहै ॥ १ संविधान इस पदका हि अर्थ स्पष्ट कीताहै कथन कीते जो कर्महैं इनके विषय भीएभी जानना इति

उशनसजीका वचनहै प्रायेति ॥ अतिशयकरके लंघनकरिके और शस्त्र और अग्नि और विष और पाश और पर्वतके शृंग उपरों गिरकर और जल और काष्ठादि इनों करके जो पुरुष अपणे आपनू हत करताहै और राजा और ब्राह्मण और वडे वडे सर्प ॥ १ ॥ और शृंगांवाले और दाडांवाले और नखांवाले और सर्प विजली इनों करके जो हत होआ है और तिसी प्रकार संकर जातितैं उत्पन्नजो होआहै इनकों अशौच और जल और अग्नि इह न देवे २ ॥ तिनके स्पर्श अथवा रोदन इनके विषयमें एक १ दिन उपवास करे अर अज्ञानतें उद्वहनादिके विषयमें अर्थात् शवादिके उठाणे विषे सांतपन कृच्छ्रव्रतका आचरण करे ३ अर जान करककरे तेबगौके मूत्रके सहित यवांनूं भक्षणकरदा होआ कृच्छ्रव्रत करे अथवा तप्तकृच्छ्र व्रत करे व्रतमें शक्ति न होवे तव एक मास भिक्षा अन्न खावे ।४। कृत्वेति आपेमृत होयेके चुक

उशनाः ॥ प्रायानशनशस्त्राग्निविषोद्बंधभृगूदकैः काष्ठाद्यैश्चात्मनोहंतुर्नृ पब्रह्मसरीसृपैः ॥ १ ॥ शृंगिदंष्ट्रिनखिव्यालविद्युताभिहतस्यच तथासं करजातस्यनाशौचोदकवह्नयः ॥ २ ॥ तत्स्पर्शेयदिवाक्रोशेदिनमेकमभो जनम् अज्ञानोद्वहनादौतुकृच्छ्रंसांतपनंचरेत् ॥ ३ ॥ बुद्धिपूर्वेपुनस्तस्मि न्कृच्छ्रोगोमूत्रयावकः तप्तकृच्छ्रोप्यशक्तौतुमासंभिक्षाशनोपिवा ॥ ४ ॥ कृत्वातुवाहनादीनिप्रायश्चित्तमकुर्वताम् तप्तकृच्छ्रद्वयाच्छुद्धिरेकमेवानुया यिनाम् ॥५॥यस्त्वशेषाःक्रियाःकुर्यात्स्नेहान्मूल्येनवापुनः। भवेत्तस्यपुनस्त प्तकृच्छ्रचांद्रायणोत्तमः ॥ ६ ॥ बृहस्पतिः । विषोद्बंधनशस्त्रैणयस्त्वात्मानं प्रमापयेत् मृतोमेध्येनलिप्तोयोनान्यंसंस्कारमर्हति १ ॥ पाशंछित्त्वातुय स्तस्यवोढावह्निप्रदस्तथा सोपिकृच्छ्रेणशुद्ध्येतघातकोपिनराधमः २ ॥

वादि कर्म नूं करके जेडे पुरुष प्रायश्चित्त नूं नहि करदे तिनकीशुद्धि दो २ तप्तकृच्छ्रसें होतीहै अर साथजान वाल्यांकी शुद्धि एक तप्तकृच्छ्रसें होतीहे ॥ ५ ॥ यइति स्नेहतें अथवा मजूरी करके जेडा पुरुष आत्मघातीकी संपूर्ण क्रिया कों करताहै तिसकी शुद्धिके वास्ते तप्तकृच्छ्र और चांद्रायण श्रेष्ठहे ॥ ६ ॥ इसी विषयमें बृहस्पतिजीने कहाहै ॥ विषेति विष और पाश और शस्त्र इनों करके जो पुरुष अपणे आपनूं हत करता है अर अपवित्र वस्तु करके लिप्त होआ होआ जो मृत होआहै सोपुरुष और संस्कारके योग्य नहि अर्थात् मरणानंतर दाहादिसंस्कार उसका नहि करणा किंतुइसीनूंहा जलविषे प्रवाहदेणा १। पाशमिति तिसके पाश का छेदन करके जो पुरुष तिसनूं चुकणे वाळा और अग्निके देणे वालाहै सोभी कृच्छ्रव्रत करके शुद्ध होताहे अर तिसके मारणे वाला भी नरांके मध्यमें नीच कृच्छ्रव्रत करके शुद्धहोवाहै२

दक्षजीकावाक्यहै ॥ आरूढेति संन्यास मार्गको प्रथम धारण करके पश्चात् विषयांकी अभिलाषा करके तिसतें पतित होआ जो ब्राह्मण है अर चंडालांके दोष करके अपणी जातितें बाहर कीताजो पुरुष है और पाशकरके जो पुरुष मृत होआहे इनांनूं स्पर्श करके चांद्रायण व्रत नूं करे ॥ १ ॥ इसी का अर्थ स्पष्ट कीता है चांडालैरिति चांडालोंने पकड कर जेंडा बंधनमे जोडया है सोचांडाल विनिःसृत है अथवा चांडालांके साथ रहकर जो आया है तिसका एह नाम है ॥ और स्मृतिमे इसकी जगा मंडलतें जो बाहर होया ऐसा अर्थ कीता है सुमंतु जीने कहाहै उद्बंधेति अपरा धी को फांसी देणा

दक्षः ॥ आरूढपतितंविप्रंचांडालाच्चविनिःसृतम् उद्बंधनमृतंचैवस्पृष्ट्वाचांद्रायणंचरेत् १।चांडालैर्गृहीत्वोद्बंधने योजितं चांडालैःसहोषित्वापरावृत्तंवा स्मृत्यंतरेतु मंडलाच्चविनिःसृतमितिपाठः तत्र सजातीयसमूहेनदूषयित्वाबहिष्कृतमित्यर्थः सुमंतुः। उद्बंधनपाशच्छेदनवहनेषु मासं भैक्षभक्षणंत्रिषवणंच स्नायात्। च्यवनः॥ आत्मघातकस्यस्पर्शनेवहने तप्तकृच्छ्रंचरेत्॥ विंशतिर्गावोदक्षिणा ब्राह्मणेषु दद्यात्॥ तथा ॥ शृंगिदंष्ट्रिनखिव्यालविषवह्निमहाजलैः सदूरात्परिहर्तव्यः कुर्वन्क्रीडांमृतस्तुयः॥ १ ॥ नागानांविप्रियं कुर्वन्दग्धश्चाप्यथविद्युता निगृहीताश्चयेराज्ञाचौरदोषेणकुत्रचित्॥ २ ॥

और पाशका छेदनकरणा और तिसको चुकणा इस विषयमें एक १ मास तक भिक्षाका अन्न भक्षण करे और तीन ३ काल स्नान करे ॥ च्यवन जीका वाक्य है आत्मेति आत्मघातीके स्पर्श और चुकणेके विषयमें तप्तकृच्छ्र व्रत का आचरण करे और बीस २० गौआं ब्राह्मणों को दक्षिणादेवे तैसे और कहतेहैं शृंगीति शृंगांवाले अर्थात् गोमाहिष्यादि और सिंहादि और नखां वाले और सर्प और अग्नि और वडाजल इनोंकके और क्रीडा करदा होआ जो पुरुष मृत होआहे सो दूरतें हि त्याग करणे योग्यहे ॥ १ ॥ नागेति और सर्पांनूं पगडदा होआ जो पुरुष मृत होआहे अथवा विजलीनें जो दग्ध कीता हैऔर चोरीके दोषकरके राजाने जेडे पुरुष पकडे हैं ॥ २ ॥

परेति परस्त्रीके हरणवाले श्रर क्रोधतें तिनां स्त्रीश्रांके पतिश्रांनें जो हत कीतेहैं श्रर भिन्न जातिवालोंनें श्रर संकीर्णजातिवालोंनें श्रर चांडालादियोंनें हत कीते जो पुरुष हैं ३ ॥ चौरेति चोर श्रीर श्रग्नि श्रोर विषइनके देणे वाले जोहैं श्रोर पापंडी श्रीर खोटिश्रांबुद्धिश्रां वालेजो पुरुषहैं उोर क्रोधतें श्रतिशयकरके विषउोर श्रग्नि श्रोर शस्त्र श्रोर पाश श्रोर जल। ४। श्रोर पर्वत श्रीर वृक्ष इनांके गिडानेवाले नरांके मध्यमें नीच जेडेपुरुष तिनांकर्मानू करदेहैं श्रर्थात् विषश्रादि करके जेड़ेपुरुष मृतहोवेहैं वा मारतेहैं श्रीर जेडे निंदित चित्राकारि करके उपजीविका करतेहैं श्रीर जेडे स्थानांकों भूषण करतेहैं श्रर्थात् स्थान भूषण करणे करके उपजीविका करतेहैं ॥ ५ मुखइति जेडे कोइंक पुरुष मुखे भग हैं श्रर्थात् जिनांके मुखसें दुर्गंध श्रावतीहै उोर जेडे नमर्दहैं उोर जेडे नपुंसकहैं श्रर्थात् जिनांका कीताहोश्रा कार्य्य नाहि सिद्दहुंदा श्रैसे जो हैं

परदाराह्वरंतश्चरोषात्तत्पतिभिर्हताः श्रसमानैस्तुसंकीर्णैश्चांडाला द्यैस्तथाहताः ॥ ३ ॥ चौराग्निविषदाश्चैवपाषण्डाःक्रूरबुद्धयः क्रोधात्प्रायोविषंवह्निंशस्त्रमुद्बंधनंजलम् ॥ ४ ॥ गिरिवृक्षप्रपातांश्च येकुर्वन्तिनराधमाः कुशिल्पजीविनोयेचस्थानालंकारकारिणः ॥ ५ ॥ मुखेभगास्तुयेकेचितक्लीवप्रायानपुंसकाः ब्रह्मदंडहतायेचयेचवाब्राह्मणै र्हताः ॥ ६ ॥ महापातकिनोयेचपतितास्तेप्रकीर्त्तिताः पतितानांनदा हःस्यान्नांत्येष्टिर्नास्थिसंचयः ॥ ७ ॥ नचाश्रुपातःपिंडोवाकार्यंश्राद्धादिकं क्वचित् एतानिपतितानांतुयःकरोतिविमोहितः तप्तकृच्छ्रद्वयेनैवतस्यशुद्धि र्नचान्यथा ॥ ८ ॥ पराशरः ॥ चांडालेनश्वपाकेनगोभिर्विप्रैर्हतोथदा श्राहिताग्निर्मृतोविप्रोविषेणात्महतोपिवा लौकाग्निनाप्रदग्धव्योमंत्रसं स्कारवर्जितः ॥ १ ॥

उोर जेडे ब्राह्मणांके शापकरके हतहोएहैं उोर जेडे ब्राह्मणांने हतकीतेहैं। ६ ।महेति उोर जेडे महापातकीहैं एह संपूर्णपतितकथन कीतेहैं श्रीर इनांपतितांका दाह उोर श्रंत्येष्टिकर्म उोर श्र स्थिश्रांका चुणना ७ ॥ उोर रोदन उोर पिंडदान उोर श्राद्धादिकर्म इनांनूंनकरे पतितांके इना कर्मांको जो पुरुष मोहित होया होया करताहै तिसकी शुद्धि दो २ तप्त कृच्छ्रव्रतकरके होतीहै उोर प्रकार करके नहि होती ॥ पराशरजीका वाक्यहै ॥ ८ चंडेति चंडाल श्रीर श्वपाक श्र र्थात् चंडाल भेद उोर गो उोर ब्राह्मण इनांने जो हतकीताहै श्रीर विषकरके मृत होश्राजो श्रग्निहोत्री ब्राह्मणहै श्रीर श्रापजो हत होश्राहै श्रर्थात् श्राप पाशादि ले करकेजो हतहोश्रा है मंत्रांकरके संस्कारतें रहित लोककी श्रग्निकरके इनका दाह करणा हवन वालीश्रग्नि करके नहिकरणा १

स्पृष्टेति सजातियोंके मध्यमें इसको जो स्पर्श करणे वाला और चुकणे वाला है सो प्राजापत्य व्रतनूंकरे अर पश्चात् ब्राह्मणांकी शिक्षानूं ग्रहण करे अर्थात् ब्राह्मण जो आज्ञा करें तिसनूंकरे ॥ २ ॥ दग्ध्वेति दाहकरके तिसकी अस्थिआंनू ग्रहण करके पश्चात् बुद्धिमान् पुरुष तिनाको दुग्धकरके धोवेवे अर पश्चात् हवनवाली अग्नि करके अपणे मंत्रकों पढकर भिन्न २ दाहकरे ॥ ३ ॥ वशिष्ठजीका वचनहै जीवेति जो पुरुष पाश डोर विष आदिकरके मृत होनेलगे अर मृत नहि होआ जीवतारहाहै सो बारां १२ रात्रकृच्छ्रव्रतनूं करे डोर तीन ३ रात्र उपवास करे डोर नित्य हि गिल्ले वस्त्रनूं धारणकरके ॥ १ ॥ अर प्राणांनूं आत्माके विषय रोककरके तीन ३ बार अघमर्षण मंत्रका पठनकरे इसतें उपरंत तिसीविधिकरके गायत्रीकों जपे २

स्पृष्टादग्धाचवोढाचसपिंडेषुचसर्वशः ॥ प्राजापत्यंचरेत्पश्चाद्विप्राणामनुशासनम् ॥ २ ॥ दग्ध्वास्थीनिपुनर्गृह्यक्षीरेणक्षालयेद्बुधः॥ स्वेनाग्निनापुनर्दाहःस्वमंत्रेणपृथक्पृथक् ॥ ३ ॥ वसिष्ठः ॥ जीवन्नात्मपरित्यागात्कृच्छ्रंद्वादशरात्रकम् ॥ चरेत्त्रिरात्रंचोपवसेन्नित्यंक्लिन्नवाससा ॥ १ ॥ प्राणानात्मनिचायम्यत्रिःपठेदघमर्षणम् अथवैतेनकल्पेनगायत्रींपरिवर्त्तयेत् ॥ २ ॥ अपिवाग्निंसमाधायकूष्माण्डैर्जुहुयाद्घृतम् यदन्यन्महापातकेभ्यस्सर्वमेतेनपूयते ॥ ३ ॥ अथवाचामेत् अग्निश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यःपापेभ्यो रक्षंतांयदह्नापापमकार्षमनसावाचाहस्ताभ्यांपद्भ्यामुदरेण शिश्नाअहस्तदवलुम्पतुयत्किंचिद्दुरितंमयीदमहमापोऽमृतयोनौसत्येज्योतिषिजुहोमिस्वाहेति ॥ विष्णुः ॥ उद्बंधनमृतस्ययःपाशंछिंद्यात्ससरात्रेणकृच्छ्रेण शुद्ध्यति तप्तकृच्छ्रेणशुद्ध्यतीति पाठांतरम्

अथवाअग्निनूं समाधानकरके कूष्मांड संज्ञिक मंत्रोंकरके घृतका हवनकरे अर औरभी महापातकोंतें जो पाप होआहै सोभी संपूर्ण इसअनुष्ठान करके नष्टहोताहै ३ । अथवा आचमनकरके अग्निश्चमेति इस मंत्रकरके होमकरे इति ॥ इसमंत्रका अर्थ संध्याके व्याख्यानमें स्पष्टकरके लिखाहै सो उसीजगातें देखलेना। पापांतेंरक्षाहोणी तिसमें प्रार्थनाहै इसमंत्रमें। विष्णुजीकावचन हैउद्बंधन करके अर्थात् फांसी लेकरके जोमृतहोआहै तिसके पाशकों जोपुरुष छेदताहै सो सप्तरात्रके कृच्छ्रव्रत करके शुद्ध होताहै । १ । और किसेजगा तप्त कृच्छ्र करके शुद्ध हुंदाहै ऐसा लिखाहै

आत्मेति पाशादिकरके जेडेदेहकों त्यागतेहैं अर्थात् फांसी और विष इत्यादिकरके जो मृत होएहैं तिनाकों स्नानादि पूर्वकभूषण करणे वाला और तिनांके निमित्तरोदनकरणे वाला और संपूर्ण प्रेतके बांधवांके साथरोदन करणे वाला स्नान करके शुद्धहोताहै और प्रेतकेबांधवांके साथ अस्थिसंचयनकों करके सहितवस्त्रांके स्नानकरे तो शुद्धहोताहै जो ब्राह्मणक्षत्री अथवा वैश्य शूद्र शवकेसाथ जावे तब नदीकों प्राप्त होकरके आठ सें अधिक हजार १००८ गायत्रीका जप करें (अर्थ) केवल ब्राह्मण शवके साथ जावे तब आठ से अधिक हजार १००८ गायत्रीका जप करे अर शूद्र किसे शवके साथ गमन करके स्नानकों करे ॥ अर प्रेतके संबंधिआंके साथ रोदन कों करके भी स्नान करके शुद्ध होताहै अर प्रेतके बांधवांके साथ अस्थिसंचयनकों करे तब समेत वस्त्रांके स्नानकों करके शुद्ध होताहै ॥ अथेति इसतें उपरंत अनाशका दि जो व्रत कुरुक्षेत्रादि विषे धारण कीते होए तिनांसें यो हट जाय

आत्मत्यागिनांच संस्कर्त्ता तदश्रुपातकारीच सर्वस्यैवप्रेतस्य तद्बान्धवैःसहाश्रुपातंकृत्वास्नानेनैवाकृतेऽस्थिसंचयने सचैलस्नानाद्द्विजःशूद्रःप्रेतानुगमनंकृत्वा स्त्रवन्तीमासाद्यगायत्र्यष्टसहस्त्रंजपेत्। द्विजःप्रेतानुगमनेष्टाधिकसहस्त्रम् शूद्रःप्रेतानुगमनंकृत्वास्नानमाचरेत् । तद्बांधवैःसहाश्रुपातंकृत्वास्नानेनशुद्धयति। तद्बांधवैःसहास्थिसंचयने कृते सचैलस्नानाच्छुध्यतीत्यन्वयः ॥ अथानाशकादिप्रच्युतप्रायश्चित्तानि ॥ तत्रमार्कण्डेयः ॥ येप्रत्यवसिता विप्राः प्रव्रज्यादिजलाग्नितः अनाशकान्निवृत्तायेवांछंतिगृहमेधिताम् १ ॥ तांश्चारयित्वात्रीन्कृच्छ्रांस्त्रीणिचान्द्रायणानिवा जातकर्मादिसंस्कारैः संस्कृताः शुद्धिभाजनाः ॥ २ ॥ पराशरः ॥ अनाशनान्निवृत्तस्तुचातुर्वर्ण्येव्यवस्थितः चांडालस्सतुविज्ञेयोवर्जनीयःप्रयत्नतः ॥ १ ॥

तिनके प्रायश्चित्तांकों कहतेहैं। तिनांके विषय प्रथम मार्कंडेयजीका वाक्यहै । यइति जो ब्राह्मण संन्यासकर्म और जल और अग्नि इनके विषय मरणके वास्ते प्रथम उद्यत होए हैं अर फेर हट गये हैं और जिनांने इच्छा सें अन्नका त्याग कीता है तिसतें जेडे हट गये हे अर फेर गृहस्थ की इच्छा करतेहैं ॥ १ ॥ तानिति तिनां कों तीन ३ कृच्छ्र व्रत अथवा तीन ३ चांद्रायण व्रत करवाके पश्चात् जात कर्मतें आद लेकर संस्कारां करके संस्कृत कीते होए शुद्ध होतेहैं ॥ २ ॥ पराशर जीका वाक्यहे अनेति अनाशक तें जो हटिआ है और ब्राह्मण और क्षत्री अथवा वैश्य अथवा शूद्र जलादिके विषय मरणके वास्ते प्रथम निश्चय करके फेर जो हट गयाहे सो पुरुष चंडाल कथन कीताहे अर सो यत्न करके दूरतें हि त्यागना चाहिए ॥ १ ॥

एह उनको कथन कीताहै जेडे पुरुष चिर काल पिछे प्रायश्चित्तकों करतेहैं अर जेडे तात्काल प्रायश्चित्तकों करतेहैं तिनको फेर संस्कार नहि करवाणा ॥ पूर्वोक्त हि अर्थ स्पष्ट कर्के किहाहै इसमें एह अभिप्रायहै कि मरणेंवास्ते पिछले कहेहोए हेतुयोंकर्के प्रवृत्ती कहीहै सो जेकरधर्म्म के वास्ते होवे तां पूर्वोक्त दोष जानणा सो किहाहै कि गंगा प्रवाहलेणे कर्के जो मृत होए हैं और कुरुक्षेत्रादिविषे अनशन कर्के और बदरिकाश्रमादिस्थानके समीपजो स्थान तिसमें पर्वत उपर आरूढ होकर डिगणेकर्के और उसी स्थानविषे कोइ स्थानहे जिसमे उद्बंधनकी विधिहै तिस कर्केऔर उसी स्थानविषेकोई अग्निकास्थानहै तिस कर्के जो मरणहै सो सुगतिकाहेतुहै इस प्रसिद्धिसें॥और जेकर क्रोध आदिकर्के मरण वास्ते प्रवृत्ति होवे तदतिसते हटणेह दोष नहि जानना

चिरकालंप्रायश्चित्तमकुर्वतोऽवस्थानेएतत् ॥ जलेऽग्न्यादौ वा मरणायानिश्चित्यप्रवृत्तःप्रत्यवसितः इयंचपूर्वोक्तहेतुभिर्मरणायप्रवृत्तिर्धर्म्मायचेत्तदोक्तं बोध्यम् ॥ गंगाप्रवाहस्वीकारेण कुरुक्षेत्रादावनशनेन बदरिकाश्रमादिसामीप्यभृगुपातेन तत्रैव स्थानविशेषेणो द्बंधनेन तत्रैवस्थानविशेषेणाग्निना मरणं सुगतिहेतुकमितिप्रसिद्धेः।क्रोधादिनाप्रवृत्तिश्चेत्तदानदोषः आपस्तम्वः।चितिभ्रष्टातुयानारीमोहाद्विचलितातत: प्राजापत्येनशुद्ध्येत्तुतस्मात्पापकर्मणः ॥ १ ॥ भविष्यत्पुराणम् ॥ आरूढोनैष्ठिकंधर्मं प्रत्यावृत्तिंव्रजेत्तुयः चांद्रायणंचरेन्मासामितिविद्धिखगाधिप ॥ १ ॥ मानस्यांप्रत्यापत्तावेतत् ॥ ⊛ अथस्पर्शप्रायश्चित्तानिदक्षः॥पानेमैथुनसंसर्गेतथामूत्रपुरीषयोः। संस्पर्शंयदिगच्छेत्तुशवोदक्यांत्यजैस्सह ॥ १ ॥

आपस्तंबजीका वचन है चितीति चिखा उपर चड करके जो स्त्री पीछेसें मोहतें हट गईहै सो तिस पापकर्मतें प्राजापत्यव्रत करके शुद्ध होतीहै ॥ १ ॥ विष्णुजीने भविष्यत्पुराणमें गरुडजीके प्रति कहाहै आरूढइति जो पुरुष संन्यास मार्गके विषय स्थित हो करके पीछेसें गृहस्थ धर्मकों प्राप्तहुआहै सो एक मास पर्यंत चांद्रयण व्रतकोंकरे हे गरुड ऐसेतूं जान । १ । एह प्रायश्चित्त तब जानना जबमन करके निवृत्त होवे ।⊛ अथेति इसतें उपरंतदक्षजी स्पर्शके प्रायश्चित्तांनूं कथन करते हैं पानइति जलादिका पान और मैथुन और मूत्र और पुरीष इनके करणेतें पिछे जब मनुष्य शव और रजस्वला स्त्री और चंडाल इनके साथ स्पर्शनूं करे १ ॥

संवर्त्त जीने कहाहै संन्येति जो खोटी बुद्धि वाला पुरुष संन्यासकों प्रथम धार कर के पश्चात् निवृत्त होताहै सो श्रमतें रहित होकर अर्थात् श्रमकों न मानकर के ६ मास निरंतर कृच्छ्र व्रतकों करे ॥ १ ॥ पराशरजीका वचन है जलेति जल और अग्नि इनके पतनके विषय और संन्यास और अन्न जलके त्याग व्रतके विषय मरणके वास्ते निश्चयनूं कर्के पश्चात् निवृत्त होए जो पुरुष हैं तिनकी शुद्धि किस प्रकार होवे ॥ १ ॥ तिनकी शुद्धि नूं आपहि पराशरजी कहतेहैं ब्राह्मेति ब्राह्मणांकी प्रसन्नता कर्के और तीर्थोके सेवन करणे कर्के और सेकडे गौआंके दान कर्के तीनों १ वर्ण शुद्धहोते हैं ॥ २ ॥ इसीमें यमजीक हतेहैं जलेति जल और अग्नि और पाश और संन्यास और अनाशक अर्थात् अन्न जल

संवर्त्तः ॥ संन्यस्यदुर्मतिःकश्चित्प्रत्यापत्तिंभजेत्तुयः सकुर्यात्कृच्छ्रम श्रांतः षण्मासान्प्रत्यनंतरम् ॥ १ ॥ अश्रांतः श्रममन्यमानोनिरालसो वा प्रत्यनंतरंकृच्छ्रोत्तरकृच्छ्रंयथा ॥ पराशरः ॥ जलाग्निपतनेचैवप्रव्रज्या नशनेतथा अध्यवस्यानिवृत्तानांप्रायश्चित्तंकथंभवेत्॥ ॥ १ ॥ ब्राह्मणानां प्रसादेनतीर्थानुगमनेनचगवांचशतदानेनवर्णाःशुद्ध्यंतिवैत्रयः ॥ २ ॥ यमः ॥ जलाग्न्युद्बंधनभ्रष्टाःप्रव्रज्यानाशकच्युताः विषप्रपतनप्रायशस्त्र घाताश्चयेच्युताः ॥ १ ॥ सर्वेतेप्रत्यवसिताः सर्वलोकविगर्हिताः चान्द्राय णेनशुद्ध्येयुस्तप्तकृच्छ्रद्वयेनवा ॥ २ ॥ असमर्थविषयमेतत् । अंगिराः । यः प्रत्यवसितोविप्रःप्रव्रज्याग्निजलादितः अनाशननिवृत्तस्तुगृहस्थत्वंचिकी र्षति ॥ १ ॥ चारयेत्त्रीणिकृच्छ्राणित्रीणिचांद्रायणानितु जातकर्मादिभिः

प्रोक्तंपुनःसंस्कारमर्हति ॥ २ ॥

का त्याग और विषभक्षण और पर्वतादितें पतन और शस्त्र इनके विषय मरणके वास्ते निश्चय कर्के फेर तिनातें निवृत्त होएहैं ॥१॥ एह संपूर्ण प्रत्यवसित हैं और संपूर्ण लोकके विषय निंदितहैं और चांद्रायणव्रत अथवा दो२ तप्त कृच्छ्र व्रत करके शुद्ध होतेहैं ॥ २ ॥ एह असमर्थताका विषयहै २ इसी विषयमें अंगिराजीकाभी वचनहै यइति संन्यास और जल और अग्नि इनके विषय मरणके वास्ते निश्चय करके फेर जो ब्राह्मण निवृत्त होआहै और अनाशनव्रततें जो निवृत्त होआहै अरतिनातें हट कर फेर गृहस्थकी इच्छा करता है ॥ १ ॥ तिस पुरुषकों तीन ३ कृच्छ्र अथवा तीन ३ चांद्रायण कर वाके फेर जातकर्मादि संस्कार कर्मकरवाणे योग्यहै ॥ २ ॥

मूत्रेतितवमूत्रकरणेतंअनंतर स्पर्शके विषयमें एक१दिन उपवास करे ऊर पुरीषके विषयमें दो२दिन ऊर मैथुनके विषयमे तीन३ दिन ऊर पानके विषयमे चार४दिन उपवास करे॥२॥चंडालके ष्ठीवनादिके स्पर्शके विषय तात्काल स्नान नूं आपस्तंवजी कथन करेंगे ॥ भुक्तेति भक्षण करके उच्छिष्ट होआ होआ आचमननूं नकरके प्रमादते जद चंडाल अथवा श्वपचके साथ स्पर्शनूंकरे तव तात्काल स्नान नूं करे।३। पश्चात् गायत्रीका आठसअधिक हजार १०८ तिलप्रकार द्रुपदादि बहुल्यादिमंत्रोंका एकसौ १०० जपकरे ऊर तीन ३ रात्र उपवास नू रक्ष कर पीछेसे पंचगव्यके पीनेकरके शुद्ध होताहै॥४॥शातातपने भी कहाहै उच्छिष्टइति उच्छिष्ट होआ होआ ब्राह्मण जद

दिनमेकंचरेन्मूत्रेपुरीषेतुदिनद्वयम् दिनत्रयंमैथुनेस्यात्पानेतुस्याच्चतुष्टयम् ॥ २ ॥ चांडालष्ठीवनादिस्पर्शे सद्यःस्नानंवक्ष्यत्यापस्तंवः भुक्तोच्छिष्टस्त्व नाचांतश्चांडालैःश्वपचेनवा प्रमादात्स्पर्शनंगच्छेत्तत्रकुर्याद्विशोधनम् ॥ ३ ॥ गायत्र्यष्टसहस्त्रंतुद्रुपदानांशतंतथा ॥ त्रिरात्रोपोषितोभूत्वापंचगव्येनशुद्ध्यतीति ॥ ४ ॥ शातातपः ॥ उच्छिष्टस्तुस्पृशेद्विप्रश्चांडालंचेत्कथंचन ॥ ऊर्ध्वोच्छिष्टस्तु संस्पृश्यद्विजस्सांतपनंचरेत् ॥ अधोच्छिष्टस्त्रिरात्रांतेपंचगव्येनशुध्यति ॥ १ ॥ भुक्तोच्छिष्ट ऊर्ध्वोच्छिष्टः उत्सृष्टमूत्रपुरीषःअधउच्छिष्टः ॥ उशनाः ॥ चांडालश्वपचैःस्पृष्टोविण्मूत्रेकुरुतेद्विजः त्रिरात्रेणविशुद्ध्येत्तुभुक्तोच्छिष्टः षडाचरेत् ॥ १ ॥

कदाचित् चंडाल नूं स्पर्शकरे॥ऊर्ध्वोच्छिष्ट होआ होआ ब्राह्मण चंडाल नूं स्पर्श करे तव सांतपन व्रतका आचरण करे अर जव अधोच्छिष्ट होकर चंडालनूं स्पर्श करे तव पंचगव्यकेपान करके ऊर तीन ३ आचमन करेतो शुद्ध होताहै ॥ १ ॥ अन्ननू भक्षण करके ऊर्ध्वोच्छिष्ट होताहै अर मूत्र ऊर पुरीष नूं त्याग करके अध उच्छिष्ट होताहै एह इनका भेद है । उशनसजी का वचन है चांडेति चांडाल ऊर श्वपच इनकरके स्पर्श कीता होआ ब्राह्मण अथवा क्षत्री अथवा वैश्य जव विष्टा ऊर मूत्रकों त्यागता है तव तीन ३ रात्रकरके शुद्ध होता है अरभुक्तोच्छिष्ट कयाभोजनकेपीछे जेकर इनके साथ स्पर्शकरे तां छे ६ रात्र करके शुद्ध होता है ॥ १

व्याघ्रजीका वाक्य है चंडेति जो पुरुष चंडालके जल करके स्पर्श करताहै सो स्नान करके शुद्ध होताहै उच्छिष्ट जब चंडालके जलकरके स्पर्शवालाहोवे तब तीन३ रात्र व्रत करके शुद्ध होवाहै १ ॥ कश्यपजीने कहाहै श्वेति कुत्ता ओैर सूर ओैर निंदित ओैर चंडाल ओैर मदिराका भांडा ओैर ऋतुवाली स्त्री इनांकों जब उच्छिष्ट होआ होआ स्पर्श करे तब कृच्छ्रसांतपनव्रत नूं करे ॥ १ ॥ एह प्रायश्चित्त कामतें अभ्यासके विषयमे जानना क्योंकि अकामकें विषयमें थोडा प्रायश्चित्त कथन करेंगे ॥ तिस प्रकार वृद्धशातातपजीने कहाहै उच्छिष्टेति ॥ २ ॥ उच्छिष्ट होआ ब्राह्मण मदिरा ओैर शूद्र ओैर कुत्ता ओैर जो अपवित्रवस्तु हैं इनांनूं

व्याघ्रः॥ चंडालोदकसंस्पृष्टः स्नानेनसविशुद्ध्यति उच्छिष्टस्तेनसंस्पृष्टस्त्रिरात्रेणविशुद्ध्यति १ कश्यपः॥ श्वसूकरांत्यचंडालमद्यभांडरजस्वलाः यद्युच्छिष्टः स्पृशेत्तत्कृच्छ्रसांतपनंचरेत् १ एतत्कामतोभ्यासे मद्यंसुराअन्यत्राल्पप्रायश्चित्तस्योक्तत्वात् तथाचवृद्धशातातपः॥ उच्छिष्टः संस्पृशेद्विप्रोमद्यंशूद्रंशुनोऽशुचीन् अहोरात्रोषितोभूत्वापंचगव्येनशुद्ध्यति १ आपस्तम्बः॥ भुक्तोच्छिष्टोत्वंत्यजैःस्पृष्टःप्राजापत्यंसमाचरेत् अधोच्छिष्टेस्मृतः पादःपादआचमनेतथा १ अधोच्छिष्टोवर्त्तमानभोजनः भोजनसमयेआचमनसमयेवायदाऽधोच्छिष्टोभवेत्तदेदंप्रा एकवृक्षेसमारूढौचांडालब्राह्मणौयदि फलंभक्षयतस्तत्रप्रायश्चित्तंकथंभवेत् ॥ २ ॥

जब स्पर्श करे तब एक दिनरात्र उपवास को रखकरके पश्चात् पंचगव्य के पीनेसें शुद्ध होता है ॥ १ ॥ आपस्तंबकावाक्यहै भुक्तेति अन्ननूं भक्षणकरके उच्छिष्टहोआ चंडालां केसाथ स्पर्श करे तब प्राजापत्यव्रतनूं करे अर भोजनकालविषय ओैर आचमन काल विषय जब अधोच्छिष्ट होवे तब प्राजापत्यव्रतका एक १ पाद करे अर्थात् चौथाहि रसा करे ॥ १ ॥ ओैर कथनकरतेहैं(प्रश्न)एकेति एक वृक्षके विषय स्थित होए होए चांडाल ओैर ब्राह्मण जब फल कों भक्षण करें तब तिसकी शुद्धि किस प्रकार होवे २ (उत्तर)इसकी शुद्धिनूं आपहि आपस्तंबजी कहतेहैं

ब्राह्मेति अपने पापनूं ब्राह्मणांनुं द सकरके सहित वस्त्रांके स्नान करे और एक दिन रात्र उपवासनू करके पश्चात् पंचगव्य करके शुद्ध होताहै ॥ ३ ॥ इसमें व्यवधान करके अर्थात् दूरकर्के और अव्यवधानकर्के क्यासमीपकर्के त्र्यरात्र अर एक रात्रका व्रतग्रहण करणा बुद्धिकेविषयमें एह प्रायश्चित्त जानना ॥ अर अज्ञानके विषयमें ब्रह्म पुराणमें कहाहै विप्रइति ब्राह्मण चंडालके सहित एक जिस वृक्षके विषय अज्ञानतें फलनुं भक्षण करे तब अघमर्षण नूजपे १ ॥ सो जप पूर्वोक्त वचनसे तीनवार जलविषे निमग्न होकर करणाचाहिए ॥ एकेति जद ब्राह्मण चंडालके साथ वृक्षकी एक शाखाके विषे स्थित होआ होआ फलांनू भक्षणकरे तब तीन ३ रात्र प्रायश्चित्तहै अर पश्चात् पंचगव्य कर्के शुद्ध होताहै इसमे समीपताके

ब्राह्मणान्समनुज्ञाप्यसवासाःस्नानमाचरेत् अहोरात्रोषितोभूत्वापंचगव्ये नशुद्ध्यति ॥ ३ ॥ अत्राग्रिमश्लोकेच व्यवधानसंनिधानाभ्यामेकरात्र त्रिरात्रे ॥ मतिपूर्वेचैतत् अमतिपूर्वेतु ब्रह्मपुराणे विप्रश्चांडालसहितोयत्र कस्मिन्वनस्पतौ ॥ अज्ञानात्फलंभुंक्तेचरेत्तत्राघमर्षणम् ॥ १ ॥ एकशा खांसमारूढःफलान्यश्नात्यसौयदि प्रायश्चित्तंत्रिरात्रंस्यात्पंचगव्येनशुध्य ति ॥ २ ॥ चांडालेनगृहीतंयस्त्वज्ञानादुदकंपिबेत् तत्रशुद्धिंविजानीया त्प्राजापत्येननित्यशः ॥ ३ ॥ भुक्तोच्छिष्टस्त्वनाचांतोह्यमेध्यंयदिसंस्पृशेत् अहोरात्रोषितोभूत्वापंचगव्येनशुद्ध्यति ॥ ४ ॥ बृहस्पतिः ॥ उच्छिष्टोच्छिष्ट संस्पृष्टःशुनाशूद्रेणवाद्विजः कृत्वोपवासंनक्तंचपंचगव्येनशुद्ध्यति १ ॥

विषय तीन ३ रात्र प्रायश्चित्त जानना ॥ २ ॥ और कहतेहैं चांडेति जो पुरुष चंडाल कर्के ग्रहण कीते होए जलनू अज्ञानसें पानकरे तिसकी शुद्धि प्राजापत्य व्रत करके जाननी चाहिए । ३ । भुक्तेति भुक्तोच्छिष्ट अथवा अनाचांत अर्थात् आचमन नूं न करके अपवित्र वस्तुनू जद स्पर्शकरे तब एक दिनरात्र उपवासनू रक्ष करके पश्चात् पंचगव्य करके शुद्ध होताहै ॥ ४ ॥ बृह स्पतिजीने कहा है । उच्छिष्टेति ॥ ब्राह्मण अथवा क्षत्री अथवा वैश्य उच्छिष्ट करके उच्छिष्ट स्पर्शकीताहोआ अर्थात् जूठे कर्के जूठाछोताहोया पश्चात् कुत्ता अथवाशूद्र इनके साथ स्पर्श नू करे तव उपवास अथवा नक्त व्रत नू करके पश्चात् पंचगव्य कर्के शुद्ध होता है ॥ १ ॥

एहप्रायश्चित्त इच्छाके विषयमें है ॥ अकामके विषयमें छागलेयजीने कहाहै ॥ उच्छीति उच्छिष्टकर्के उच्छिष्ट स्पर्शकीता होआ स्नाननू करे और जब स्नानकर रहे और फेर उच्छिष्ट करके स्पर्श करे तब प्राजापत्य व्रतनू करे ॥ १ ॥ संवर्त जीका वाक्यहै ॥ कृतेति त्यागया है मूत्र और पुरीष जिसने अर्थात् अथ उच्छिष्ट अथवाभुक्तोच्छिष्ट ब्राह्मण अथवाक्षत्री अथवा वैश्यजद कुत्ता और चंडाल इन करके स्पर्श करे तब प्रथम स्नान करके देवीका एकहजार १००० जप करे अर्थात् गायत्रीका जप करे१कर्मेति लुहार और धोबा और घुमार और धीवर और नट इनांकरके उच्छिष्ट जद स्पर्श करे तब एक रात्रजल पानकरे और जब लुहारादि उ

कामकारविषयमेतत् ॥ अकामतस्तुछागलेयोदितम्। उच्छिष्टोच्छिष्टसंस्पृष्टंस्नानंयेषुविधीयते तेनैवोच्छिष्टसंस्पृष्टःप्राजापत्यंसमाचरेत् १ संवर्त्तः कृतमूत्रपुरीषोवाभुक्तोच्छिष्टोथवाद्विजः श्वादिस्पर्शेजपेद्देव्याःसहस्त्रंस्नानपूर्वकमिति १ तेनस्नातेनपुनरुच्छिष्टःसंस्पृष्टश्चेत्तदाप्राजापत्यामित्यर्थः कर्मारंरजकंवेनंधीवरंनटमेवच एभिःस्पृष्टस्तथोच्छिष्टएकरात्रंपयःपिवेत् १ ब्राह्मणाद्वैश्यकन्यायांजातोम्बष्ठः ब्राह्मण्यांविशोजातोवैदेहकः वैदेहकादम्बष्ठ्यांजातोवेनः संकरजातीयः ॥ तैरुच्छिष्टैस्त्रिरात्रंस्याद्घृतं प्राश्यविशुध्यति ॥१ ॥ भुंजानेनतुविप्रेणस्पृष्टायदिरजस्वला ॥ शिशुकृच्छ्रेणशुध्येत्तुप्राणायामशतेनच ॥ २ ॥ आपस्तंवः ॥ उच्छिष्टेनतुसंस्पृष्टोविशोचंस्तुद्विजोत्तमः ॥ उपोष्यरजनीमेकांपंचगव्येनशुध्यति ॥ १॥ चांडालादिविषयमेतत् ॥

च्छिष्टहोन तिनकरके स्पर्शकरे तबतीन३रात्रजलपान करे पश्चात् घृत नू भक्षणकरके शुद्धहोताहै १ भुंजेति ॥ भोजनकरदे होए ब्राह्मणने रजस्वला स्त्री जद स्पर्श करी तब शिशुकृच्छ्र व्रत अथवा सौ १०प्राणायाम करके शुद्धहोता है ॥ २ ॥ आपस्तंवजीका वचनहै ॥ उच्छिष्टइति विशोचनूक्या विशेष कर्के शोक कर्ताहोया ब्राह्मण और क्षत्री अथवा वैश्य इनकेमध्यमें श्रेष्ठ उच्छिष्ट चंडालनें जद स्पर्श कारए तबएक १ रात्र उपवास रक्ष कर्के पश्चात् पंचगव्य करके शुद्ध होताहै १ चंडालादिका एहविषयहै

हारीत जीका वाक्यहै ॥ महेति ब्रह्महत्यादि पाप नू करण वालेके साथ स्पर्श होवे तब स्नानमात्र करें जब चंडालादिके साथ स्पर्श कीता होआ फेर चंडालादिके साथस्पर्श करे तब ब्रह्मकूर्च करके शुद्ध होताहै ॥ १ ॥ और कहते हैं त्रीति तीन ३ रात्र अथवा एक १ रात्र जो पुरुष अन्न नू न भक्षण करदा होआ अर पंच गव्य नू भक्षण करदा होआ इच्छीतरां ओंकार नू जपे सो भी शुद्धि नू प्राप्तहोताहै अर्थात् शुद्ध होताहै ॥ २ ॥ कृतेति मूत्र अथवा पुरीष इनके त्यागयां होआं अथवा भुक्तोच्छिष्ट ब्राह्मण और क्षत्री अथवा वैश्य जब कुत्ता और चंडाल इत्यादि कर्के स्पर्श करे तब स्नान नू करके पश्चात् हजार गायत्री काजपकरे ॥ ३ ॥ आपस्तंबजीनेकहाहै विप्रइति जब उच्छिष्ट ब्राह्मणकेसाथ कदाचित् ब्राह्मण स्पर्श करे तब आचमनकर्के शुद्ध होताहै एह आंगिरसजीने कहाहै ॥ १ ॥ और कथन करतेहैं

हारीतः महापातकिसंस्पर्शेस्नानमेवविधीयते संस्पृष्टस्तुयदास्पृष्टोब्रह्मकूर्चेनशुद्ध्यति१ स्पर्शानंतरंपुनः स्पृष्टइत्यर्थः त्रिरात्रमेकरात्रंवायोनश्नन्पंचगव्यभुक् जपेद्वप्रणवंसम्यगेवंशुद्धिमवाप्नुयात् २ कृतमूत्रपुरीषोवाभुक्तोच्छिष्टोथवाद्विजः श्वादिस्पृष्टोजपेद्देव्याः सहस्रंस्नानपूर्वकम्३ देव्यागायत्र्याः आपस्तंवः विप्रोविप्रेणसंस्पृष्टउच्छिष्टेनकथंचन आचम्यवैतुशुद्धःस्यादित्यांगिरसभाषितम् १ उदक्यास्पृष्टउच्छिष्टोविड्वराहश्वकुक्कुटैःकाकमार्जारकृव्याद्भिरुपवासेनशुद्ध्यति २ येनकेनचिदुच्छिष्टोह्यमेध्यंयदिसंस्पृशेत् अहोरात्रोपितोभूत्वापंचगव्येनशुद्ध्यति ३ छागलेयः ॥ उच्छिष्टःसंस्पृष्टोहिप्रोमद्यशूद्रशुनोशुचीन् अहोरात्रोपितःस्नात्वापंचगव्येनशुद्ध्यति १ उच्छिष्टःस्पृष्टआचामेदुच्छिष्टेनस्वजातिना नक्तेनचोपवासेनक्षत्रविट्स्पर्शनेक्रमात् ॥ २ ॥

उदेति रजस्वलास्त्री और वैश्य और ग्राम्य सूकर और कुत्ता और कुकुड और काक और बिल्ला और गिद्धादि इनकरके जब उच्छिष्ट स्पर्श करे तब एक १ उपवासकर्के शुद्ध होताहै २ ॥ येनेति जिस किसि वस्तु करके उच्छिष्ट होआ पुरुष अपवित्र वस्तु नू जद स्पर्श करे तब एक १दिन रात्र उपवास रक्षकर्के पश्चात् पंचगव्य कर्के शुद्ध होताहै ॥ ३ ॥ छागलेयजीकावाक्यहै उच्छिष्टइति उच्छिष्ट ब्राह्मण मदिरा और शूद्र और कुत्ताऔर अपवित्र वस्तु इनांनू जद स्पर्श करे तबएक दिनरात्र उपवास नू रक्षकर्के पश्चात् स्नान करे फेर पंचगव्यका पान करे तो शुद्ध होजाताहै ॥ १ ॥ उच्छिष्टइति उच्छिष्ट सजातिकरके उच्छिष्ट पुरुष जब स्पर्शकारिए तब आचमन कर्के शुद्ध होताहै अर जब उच्छिष्ट क्षत्री कर्के ब्राह्मण स्पर्शकरे तब नक्तव्रतकर्केशुद्ध होताहै अर जब उच्छिष्ट वैश्य कर्के ब्राह्मण स्पर्श करे तब उपवास करके शुद्धहोताहै ॥ २ ॥

इसोमे शातातपजीका वाक्यहे जो ब्राह्मण जेकर चांडालकी छाया विषे आजावे तद तिसकी शुद्धिवास्तेस्नान और घृतप्राशन किहाहै । १ । और जब ब्राह्मण चांडालादिने हस्थलए काष्ठ कंक अथवा वस्त्रकर्के स्पृष्ट क्या छोता होवे तद अंगांनु धो कर्के आचमनकरे और जेकर उह जूठा भीषा तद रात्रि भोजनका त्यागभी करे । २ । औपकायन ऋषिका वाक्यहे अस्पृश्य जो चांडालादि तिनांके साथ व्यवधानसें बेडी आदिकर्के तरणेकी इच्छावाला होया होया जावेतद हस्थ और पाद जलविषेपारक्षे परंतु साक्षात् स्पर्श नकरे तां उसको दोष नहि ॥ १ ॥ शातातपजी का वचनहै कापालिक जो हैं पाषंडी तिनके साथ जब ब्राह्मणादि स्पर्श करे तद विधि पूर्वक स्नानकर्के १०० इकसउ प्राणायामकरे और तप्तघृतकापानकरे तां शुद्ध हुंदाहै । १ । षट्त्रिंशन्मत

शातातपः । यस्तुछायांश्वपाकस्यब्राह्मणोप्यधिगच्छति तत्रस्नानंतुतस्यैवघृतप्राशश्चशोधनम् ॥ १ ॥ अंत्यजैर्हस्तकाष्ठनवाससास्पृष्टएवच प्रक्षाल्यांगंतदाचामेदुच्छिष्टस्तुनिशांक्षिपेत् ॥ २ ॥ औपकायनः । अस्पृश्येनसहैकांतेतरन्नौसंक्रमादिभिः निदध्यादप्सुपाण्यादीन्नदुष्येत्तेनचास्पृशन् ॥ १ ॥ शातातपः ॥ कापालिकानांसंस्पर्शेस्नानंःकृत्वायथाविधि प्राणायामशतंकृत्वाघृतंप्राश्यविशुद्ध्यति ॥ १ ॥ षट्त्रिंशन्मते ॥ बौद्धान्पाशुपतांश्चैवलोकायतिकनास्तिकान् विकर्म्मस्थान्द्विजान्स्पृष्ट्वासचैलोजलमाविशेत् ॥ १ ॥ मनुः ॥ दिवाकीर्त्तिमुदक्यांचपतितंसूतिकांतथा शवंतत्स्पर्शिनंचैव स्पृष्ट्वास्नानंसमाचरेत् ॥ १ ॥ दिवाकीर्त्तिश्चाण्डालः ॥ एतदकामतः तथाचबृहस्पतिः ॥ दिवाकीर्त्तिचितियूपंपतितंचरजस्वलां स्पृष्ट्वाप्रमादतोविप्रः स्नानंकृत्वाविशुद्ध्यति ॥ १ ॥

जो३६ छत्री ऋषियों ने कठे होकर्के वनायाहै तिसमें लिखयाहै । बाविति बौद्ध नास्तिक लोक और पाशुपत पशुपतिजीकेमतवाले और लोकायतिकएभी तिन्हांकेमतमेंमिलतेहैं और नास्तिक और विरुद्ध कर्म्मवाले जो त्रयवर्ण इनको स्पर्शकर्के सहित वस्त्रांके जलमें प्रवेशकरे । १ । मनु जी कहतेहैं दिवाकीर्त्ति इसजगा चांडालजानणा और रजस्वलास्त्री और पतित और सूतिकाक्या प्रसूतास्त्री और शव क्या मृतदेह और तिसके स्पर्श करण वाला इनका स्पर्शकर्के स्नानकरे १ ॥ इह प्रायश्चित्त अकामते कीते होए पापविषे जानणा। सोई बृहस्पति जी कहतेहैं दिवेति चांडाल और चिता शवखट्वा और यूप जिसस्तंभके साथ पशुको बांध कर्के मारतेहैं और पतित और रजस्वला इनांको जेकर प्रमादसे ब्राह्मण स्पर्श करे तां स्नान कर्के शुद्ध होताहै ॥ १ ॥

और कामनाकर्के इसकोंजो कर्त्ताहै तिसवास्तेभी वृहस्पतिजी कहतेहैं पतीति पतित और सूति का और मींच उौर शव इनका कामनाते दर्शनकरे तां स्नानकर्के उौर पवित्रवस्तुस्पर्शते अनंतर घृतको प्राशनकरे तो शुद्धहोताहै ॥ १ ॥ और शव इसजगा मृत मनुष्यका जानणा जेकर कुत्ते आदि मृत होए के साथ स्पर्शादि होवे तां अधिककल्पना करणी अर्थात् गायत्रीका जपभी साथ करणा और मृत चांडालके स्पर्शविषे आगे प्रायश्चित्त आवेगा ॥ और मोल लेकर मुडदा उठाणे वाले जो पुरुषहैं तिनांको प्राजापत्य कराणा परंतु तिसके स्पर्श विषे गायत्रीका जपभीकराणा ॥ आगेकहणा जो वाक्य तिसतेंइहबहुतवार करणेमें जानना ॥ और एकवारकरणेमें मार्कण्डेयपुराण विषे वचनहै अभोज्येति अभोज्य और सूतिका और खंडक्या नपुंसक और मा

कामतोपिसएव पतितंसूतिकामंत्यंशवंस्पृष्ट्वातुकामतःस्नात्वाचैवशुभंस्पृष्ट्वा घृतंप्राश्यविशुद्धयति ॥ १ ॥ शवेति मृतमनुष्यशवस्पर्शे मृतश्वादिस्पर्शेत्वधिकंकल्प्यम् मृतचांडालस्पर्शेवक्ष्यते मूल्येनशवहारकाणां प्राजापत्यं । तत्स्पर्शेगायत्रीजपोपिवक्ष्यमाणवाक्यात् ॥ एतच्चाभ्यासेसकृद्विषये मार्कण्डेयपुराणे अभोज्यसूतिकाषण्डमार्जाराखुश्वकुक्कुटान् पतितापविद्धचांडालमृतहारांश्चधर्मवित् संस्पृश्यशुद्धयति स्नानादुदक्या ग्रामसूकरौ ॥ १ ॥ कापालिकानांस्वरूपं यथा नरास्थिमालाकृतभूरिभूषणः श्मशानवासीनृकपालभोजनः पश्यामियोगांजनशुद्धदर्शनोजगन्मिथोभिन्नमभिन्नमीश्वरादिति॥१॥ अभोज्यारजकादयः अपविद्धोबहिष्कृतः मृतहारोमूल्येनशवहारकः मार्जारोवनमार्जारःस्नानेविशेषमाहगार्ग्यः

र्जार क्या बिल्ला और चूहा और कुत्ता और कुक्कुट और पतित और अपविद्ध और चांडाल और मृत के उठाणेवाला और रजस्वला और ग्रामशूकर इनांके साथधर्मवेत्तापुरुष स्पर्शकरेतां स्नानतें शुद्ध होताहै ॥ १ ॥ कापालिकादियोंका स्वरूपकहतेहैं नरेति मनुष्यकी हड्डियोंकीमालाकर्के जो भूषित होवे और श्मशानवासी और नृकपाल जो मनुष्यके मस्तककी हड्डी तिसविषे भोजन करे उौर कहे किजगत् ईश्वरसें भिन्नहै और अभिन्नभी है ऐसे मैं देखताहुं ऐसे योगरूपी अंजन कर्के शुद्धहै दर्शन जिसका ऐसे का नाम कापालिकहै ॥ १ ॥ अभोज्यनाम रजकादिका है अपविद्ध नाम उसका है जो लोकसे बाहरनिकाल्याहै और मृतहार वोहै जो मोल लेके मुडदेकों उठाताहै और मार्जार इसजगा वनका बिल्ला ग्रहण करणा ॥ स्नानमे विशेष गार्ग्यजी कहतेहैं ॥

क्रव्येति कच्चे मांसनूं भक्षणे वाला जीव अर्थात् गिरझ काकादि घोडा और गधा और ऊट इनके साथ जब व्यवधान करके स्पर्श करे तब वस्त्रोंतें रहित अथवा वस्त्रांके सहित स्नाननूं करके शुद्ध होताहै ॥ १ ॥ जब जानके स्पर्श करे तबसहित वस्त्रांके स्नानकरे अर जब जानके न करे तब वस्त्रोंतेंरहित स्नान करे ॥ और कथन करते हैं । शूद्रमिति शूद्र और मलाह इनांनूं स्पर्श करके ब्राह्मण अथवा क्षत्री अथवा वैश्य आचमनहि करके शुद्ध होजाताहै अर सूर्यका दर्शन अथवा स्नान अथवा प्राणायाम अथवा तपका वल अथवा गायत्र्यादिका जप इनकरके भी सो प्रायश्चितहो जाताहै ॥ २ ॥ जो पुरुष स्नानमें अशक हैं तिसकों शूद्रके स्पर्शमें आचमनही कहाहै अर समर्थकों स्नानहि कहाहै इस कारणतें और किसे स्मृतिकाभी वाक्यहै ॥ एडेति ग्रामका सूर और कुकड और काक और कुत्ता और शूद्र और चांडालइनांनू

क्रव्यादश्वखरोष्ट्रैश्चस्पर्शेऽव्यवहितेद्विजः ॥ अचैलंवासचैलंवास्नानंकृत्वाविशुद्ध्यति ।१ । सचैलंमतिपूर्वेऽन्यत्राचैलम् शूद्रंस्पृष्ट्वानिषादंचशुद्ध्येदाचमनाद्द्विजः तद्वानिदर्शनस्नानप्राणायामतपोवलात् । २ । तत्प्रायश्चित्तंहि इनस्यसूर्य्यस्यदर्शनेनस्नानेनप्राणायामेनतपोवलेन गायत्र्यादिनावा भवति स्नानासमर्थस्यशूद्रस्पर्शनेआचमनम् समर्थस्यतु स्नानमेव अतएवस्मृत्यन्तरम् । एडकंकुक्कुटंकाकंश्वशूद्रांत्यावसायिनःदृष्ट्वैतान्नाचरेत्कर्म्म स्पृष्ट्वैतान्स्नानमाचरेदिति १ एतान्दृष्ट्वाकर्म्मनाचरेत्किंतुआचम्याचरेदित्यर्थः॥ यद्वा दृष्ट्वैतानाचमेत्प्राज्ञइतिपाठान्तरम् यद्वा सच्छूद्रस्पर्शेआचमनमसच्छूद्रस्पर्शेस्नानम् ॥ एडकोग्राम्यशूकरः॥ वृद्धयाज्ञवल्क्यः॥चांडालपुस्कसम्लेच्छाभिल्लकापालिपारदान् उपपातकिनश्चैवस्पृष्ट्वास्नानंसमाचरेत् ॥ संवर्त्तः ॥ कैवर्त्तमृगयुव्याधसौरशाकुनकानपिरजकंचतथास्पृष्ट्वास्नात्वैवाशनमाचरेत् ॥ १ ॥

